PAUṢKARĀGAMA

Edited by

PANDIT K. RAMACHANDRA SARMA

THE ADYAR LIBRARY AND RESEARCH CENTRE

PAUṢKARĀGAMA

Edited by

PANDIT K. RAMACHANDRA SARMA

THE ADYAR LIBRARY AND RESEARCH CENTRE

THE ADYAR LIBRARY PAMPHLET SERIES No. 50

GENERAL EDITOR
K. KUNJUNNI RAJA, *Director*

पौष्करागमः

(ज्ञानपादः)

PAUṢKARĀGAMA

(Reprinted from the *Adyar Library Bulletin*, Vol. 58, 1994)

Edited by
PANDIT K. RAMACHANDRA SARMA

THE ADYAR LIBRARY AND RESEARCH CENTRE
THE THEOSOPHICAL SOCIETY
ADYAR, MADRAS 600 020, INDIA

© The Adyar Library and Research Centre
Adyar, Madras 600 020, India, 1995

ISBN 81-85141-18-5

Agents:

AMERICAS AND JAPAN
The Theosophical Publishing House,
P.O. Box 270, Wheaton,
Illinois 60189-0270, U.S.A.

INDIA AND OTHER COUNTRIES
The Theosophical Publishing House,
The Theosophical Society,
Adyar, Madras 600 020, India.

Printed at the Vasanta Press, The Theosophical Society
Adyar, Madras 600 020, India

INTRODUCTION

The Adyar Library and Research Centre has brought out critical editions of many important works on Vaiṣṇava Tantra, both Pāñcarātra and Vaikhānasa, such as the *Ahirbudhnya Saṃhitā*, the *Lakṣmītantra*, the *Sanatsujātīya Saṃhitā* and the *Pāñcarātrarakṣā*. Now we have great pleasure in bringing out a correct and useful edition of an important book on Śaivāgama, the *Pauṣkarāgama*, the first edition of the available portion of the text in Devanāgarī script prepared by our senior Pandit K. Ramachandra Sarma.

The *Pauṣkarāgama* is an Upāgama said to be a supplement to the *Pārameśvarāgama*, (the 26th Mūlāgāma). Only its *Jñānapāda* section in eight Paṭala-s is available now. It has been published in Grantha script by the Śivajñānabodha Press, Madras in 1890, with Tamil explanation. Another important edition, also in Grantha script, of the text with the commentary of Umāpati Śivācārya belonging to the 14th century was published from Chidambaram in 1925. In the beginning of the Jñānapāda, the author says that Caryā and Kriyā sections have been completed already; this shows that these sections were part of the text, though not available now.

Many verses are found quoted as from the *Pauṣkarāgama* in early works.

1. Abhinavagupta, *Tantrāloka*, p. 101.
2. Rāmakaṇṭha in his commentary on *Nareśvara-parīkṣā* (Kash. Texts, XLV, p. 256).
3. Nārāyaṇakaṇṭha in his commentary on *Mṛgendrā-gama*, (Kash. Texts, L, p. 95).
4. Sāyaṇa in *Sarvadarśanasaṅgraha* (Ānand. Ser., p. 68).
5. Utpala in *Spandapradīpikā* (Viz. Skt. Ser. 16, p. 13).

H. Brunner's view is that the absence of verses quoted as from *Pauṣkarāgama* in his commentary on *Mātaṅgaparameśvarāgama* (ed. by N. R. Bhatt, Pondicherry, 1977, 1988) in the available text shows that the available text is not the original *Pauṣkarāgama* ('*Jñāna* and *Kriyā* relation between theory and practice in the *Śaivāgamas*' *Felicitation Volume to A. Padoux*). But the verses are mainly on rituals, and their absence in the *Jñānapāda* section does not prove that the *Jñānapāda* is not genuine. The commentary by Umāpati Śivācārya shows that the text was popular in the 14th century and was considered as part of the genuine text of the *Pauṣkarāgama*.

Umāpati Śivācārya was a younger contemporary of Maraijñāna Deśikar and Śivāgrayogin to whose commentaries he refers. Jñānaśivācārya's commentary is available in the India Office Library (No. 6143).

The *Śaivāgamaparibhāṣāmāñjarī*, anthology of Śaiva texts compiled in the 16th century by one Vedajñāna from Chidambaram (probably identical with Maṛaijñānadeśikar) uses the *Pauṣkarāgama* pro-

fusely. The identified verses are given below on the basis of the Pondicherry edition. The quotations show that the present text of the *Pauṣkarāgama* was considered as the genuine, authoritative text in the 16th century.

Śaivāgamapari-bhāṣāmañjarī (Pondicherry edition 1979)		*Pauṣkarāgama* (Present edition)
Pages		
63	P. 3	(Il 28a-29)
69	P. 24	(IV. 19)
75	P. 24	(IV. 21)
99	P. 11	(II. 11)
101	P. 13	(II. 30b-31a)
103	P. 24	(IV. 27a-28a)
105	P. 24	(IV. 2-b-29a)
107	P. 52	(VI. 33b, 35b, 36a)
109	P. 62	(VI. 140b-142a)
113	P. 8	(I. 736-77a)
165	P. 86-7	(VII. 28b-31a, 32a)
167	PP. 88-89	(VII. 43b-44a, 44b-49)
171-3	P. 12	(I. 21, 25b, 26a, 26b-27a)
223	P. 48-49	(VI. 1b-3)
225	PP. 39	(V. 3-2)
235	PP. 87	(VII. 37-39)
275	PP. 35	(IV. 137a-141)
277	PP. 35-36	(IV. 142-146)

The quotations are found mostly in the same

way as in the present text of the *Pauṣkarāgama*, confirming their popularity even in the 16th century.

Abhinavagupta quotes a line from the available text of the *Pauṣkarāgama* (8, 76) anonymously in his *Īśvarapratyabhijñāvīmarśinī* (p. 264, Motilal Banarsidass ed. 1938). The reading there is *na tair vinā bhavet śabdo nārtho nāpi citer gatiḥ*. *Pauṣkarāgama* (1. 90) is quoted in Bhaṭṭa Nārāyaṇakaṇṭha's commentary on the *Mṛgendrāgama* (1. 28). ('*Pauṣkarapārameśvare*')

One line from the *Bhagavadgītā* (II. 19) is found in the text. One verse from *Gauḍapādakārikā* appears twice with verbal changes; this is also found in *Amṛtabindūpaniṣad*, and in Bhavya's *Madhyamakahṛdayakārikā*.

Das Gupta's statement (*History of Indian Philosophy*, Volume V, p. 19) that the *Pauṣkarāgama* was composed by Umāpati Śivācārya is a mistake, due to a confusion between the author and the commentator.

The text of the *Pauṣkarāgama* is in the form of a dialogue between Ṛṣi-s and Īśvara; the former raise questions and the latter answers them. The name of Pauṣkara does not appear as an interlocutor in the work. There are eight *Paṭala-s* dealing respectively with *pati*, *bindu*, *māyā*, *paśu*, *pāśa*, *puṃstva*, *pramāṇa*, and *tantrāvatāra*; all these form parts of the *Jñānapāda* (or *Vidyāpāda*).

It begins with the sages praising Śiva, referring to his valiant exploits. They tell him that the sections on *Kriyā* and *Caryā* have already been explained

to them, and that they are eager to hear the *Jñāna* section. Now Śiva explains:—

The six categories are *pati*, *kuṇḍalinī*, *māyā*, *paśu*, *pāśa* and *kāraka*. Śiva is the unconditioned, and remains the sole agent without undergoing any change. His *Śakti* is inherent in him, and the six categories are known through that Śakti. When the manifold creation shrinks into the *bindu*, Śiva is at the stage of dissolution (*laya*). He remains unmoved, but His *Śakti-s* begin to operate in the *bindu*, and the *bindu* becomes fit for the data of experience. This state of *bindu* with Śiva reflected in it is called Sadāśiva. Even at this stage there is no real change in Śiva. When the energies are in a state of operation, we have the state of creation, and the experience of it is called *bhoga*. It is through His *Saṃkalpa* alone that He moves the *bindu*, and so there is no need for changing.

The dynamic aspect of Śiva is Śakti; that aspect which becomes the material of the universe is *bindu*. Śakti remains inseparably united with Śiva; but *bindu's* connection with Śiva is indirect, through Śakti. Bindu is the material of creation, and Śakti is its efficient cause. Śakti, being pressed by the will of Śiva, activates *bindu*; when the material of Māyā etc., is agitated, it becomes the cause of the body and senses of living beings. According to the *Pauṣkarāgama*, the coiled Śakti or Kuṇḍalinī, identified with *bindu*, belongs to Lord Śiva, but it is essentially insentient. It functions as a material cause, like clay for a potter.

Bindu is the meeting point of spirit and matter. It is the agent of the activity of knowing. Consciousness can be conscious of itself, just as light can illuminate other things, as well as itself. The *bindu* constitutes both the thought element and the speech element. The phenomenal world consisting of *śabda* and *artha* has the *bindu* as its source. The fourfold manifestation of speech—*vaikharī*, *madhyamā*, *paśyantī* and *parā*—has *bindu* as its starting point. *Vaikharī* is the audible speech with the various phonemes in a specific order of sequence; this is what expresses the meaning. The *madhyamā* has the order of sequence potentially but not actually. The third, *paśyantī*, has all the distinctions only in a hidden way, just like the egg of a peahen contains the beautiful colour designs of the wings.

Mala or impurity is always associated with all the *jīva-s*. *Mala-s* are regarded as sevenfold: *moha*, *mada*, *rāga*, *viṣāda*, *tāpa*, *śoṣa* and *vaicitrya*. Of these *moha* is the natural one, and is the cause for the other six like attachment. The *mala-s* obscure the omniscient character of the self first, as darkness obstructs the eye from seeing.

The *Pauṣkarāgama* says that *jīva-s* are eternal, and hence their knowledge must also be eternal. The difference of knowledge in the individuals is because of the various veils of *mala* which obstruct their knowledge. The self is realized as revealing itself as well as others. It cannot be explained as due to the reflection of the consciousness in *buddhi*, for it is not conscious. The self is an eternal being and can perceive all things, and

act as it likes. An entity like fire cannot be distinguished from its energy (*śakti*).

The objects preserved must be real entities. The self intuitively realized as all-consciousness, cannot be considered to have only limited knowledge. The apparent limited knowledge must be due to the association with impurities (*mala-s*). The energy of consciousness is eternal and its nature cannot be disturbed through association with *mala-s*.

The fifth chapter deals with the different kinds of *pāśa-s* or bonds: *kalā*, *vidyā*, *rāga*, *kāla* and *niyati*. These five categories proceed from *māyā*. All experience is due to the functioning of the power of knowledge (*grāhaka*) and the objects to be known (*grāhya*). From *kalā* comes *vidyā; kalā* supplies the basis of experience as time and space. Other categories of the intellect also evolve, and we have the concept of *buddhi*, deliberate decision. The *buddhi* manifests itself through different forms according to their *vāsanā-s*. The difference between *buddhi* and *ahaṃkāra* is this: when something is deliberately known, it is through *buddhi;* when objects came to our view, as awareness, it is through *ahaṃkāra*. There are three kinds of creation: *sāttvika*, *rājasa* and *tāmasa*. When things are perceived by the senses, and their nature known, this inner function belongs to the mind.

Perception is possible only when consciousness is associated with the sense organs. The Buddhist theory of *arthakriyākāritva* is rejected. The sense can perceive only objective qualities, but not the substance behind them.

According to the Āgama the *tanmātra-s* are subtle forms of the *bhūta-s*; they represent the architypal, quintessential form of the Mahābhūta-s. The individual *tanmātra* generates the relative *Mahābhūta*, not in isolation, but by associating itself with the other *tanmātra-s* in various ways.

The seventh Paṭala is devoted to epistemology. The *Pauṣkarāgama* accepts only four Pramāṇa-s: *Pratyakṣa* (Perception), *Anumāna* (Inference), *Śabda* and *Arthāpatti* (Presumption). *Pramāṇa* (Means of knowledge) is the power of pure consciousness free from *saṃśaya* (doubt) etc. Doubt is due to the mind oscillating between two possible, similar things. *Viparyaya* is the wrong view not based on the correct form. *Smṛti* (memory) is due to the objects experienced before. Valid knowledge must be free from doubt and memory.

Pure consciousness is the really valid part in knowledge. Epistemology dealing with the means of valid knowledge fails in grasping the absolute Reality, Śiva. Knowledge is of two kinds: the higher and the lower (*para* and *apara*). The higher is Śiva's knowledge, and bestowed by Śiva himself or by some *Guru* after initiation. The Pramāṇa-s are useful in getting the lower knowledge. The section of epistemology in the *Pauṣkarāgama* is important, since it is one of the few Śaivāgama-s dealing with epistemology.

K. KUNJUNNI RAJA

विषयानुक्रमणिका

		पुटाङ्कः
Introduction—*K. Kunjunni Raja*	..	v
पौष्करागमः (ज्ञानपादः)		
प्रथमः पटलः । पतिनिरूपणम् ।	..	1
द्वितीयः पटलः । बिन्दुनिरूपणम् ।	..	10
तृतीयः पटलः । मायानिरूपणम्	..	16
चतुर्थः पटलः । पशुपदार्थनिरूपणम् ।	..	22
पञ्चमः पटलः । पाशनिरूपणम् ।	..	39
षष्ठः पटलः । पुंस्त्वम् ।	..	48
सप्तमः पटलः । प्रमाणपटलः ।	..	84
अष्टमः पटलः । तन्त्रावतारपटलः ।	..	92
परिशिष्टम्		
१ श्लोकार्धानुक्रमणिका ।	..	99
२ प्रधानपदानुक्रमः	..	130
३ Pauṣkarāgama Quotations in Other Works	..	157
Bibliography	..	161
Errata	..	162

पौष्करागमः

प्रथमः पटलः

— ० —

ऋषयः—

भगवन् देवदेवेश ब्रह्मविष्ण्विन्द्रनायक ।
आपिङ्गलजटाजूटारोपितार्धेन्दुशेखर ।। १ ।।

व्याघ्रचर्मपरीधान तदूर्ध्वव्यालबन्धन ।
नित्यशत्रुमृगानीकसेव्यमान दयानिधे ।। २ ।।

ललाटनेत्रसप्तार्चिर्दग्धत्रिपुरमन्मथ ।
अम्भोधिमथनोद्भूतविषनीलितकन्धर ।। ३ ।।

क्रियाचर्ये प्रसादेन तवास्माभिः श्रुते पुरा ।
अधुना ज्ञानपादं नु श्रोतुमिच्छा गरीयसी ।। ४ ।।

वर्तते तामपाकर्तुमर्हस्यस्माकमीश्वर ।
अधिकारे वयं देव नियुक्ता भवता यतः ।। ५ ।।

ज्ञानसाध्योऽधिकारो हि मुक्तिश्च व्यक्तिरीश्वर ।
ज्ञायन्ते येन पत्याद्याः पदार्थाः षड् द्विजोत्तमाः ।। ६ ।।

तज्ज्ञानपादमित्युक्तं साधकं देशिकात्मनाम् ।
शिवस्य समवेताया शक्तिर्ज्ञानात्मिकामला ।। ७ ।।

सैव ज्ञानमिति प्रोक्तं शाब्दं तदनुमापकम् ।
पतिः कुण्डलिनी माया पशुः पाशश्च कारकः ।। ८ ।।

इति प्रोक्ताः पदार्थाः षट् शैवतन्त्रे समासतः ।
लयभोगाधिकारात्मव्यापारत्रयलक्षितः ।। ९ ।।

स्वभावादच्युतः शक्तः पदार्थः पतिसंज्ञितः ।
लयादिर्व्वापृतिर्यत्र शुद्धाध्वा वा यतोऽजनि ।। १० ।।

सा तु कुण्डलिनी शक्तिर्नित्याधिष्ठेयरूपिणी ।
उत्पादयति सा माया खचिता कर्मभिर्नृणाम् ।। ११ ।।

पशुः पशुत्वसंरुद्धदृक्क्रियाप्रसरः सदा ।
सकलाकलभेदेन त्रिधाबन्धवशात् स्थितः ।। १२ ।।

कलादिक्षितिपर्यन्ता स्थिता तात्त्विकसहतिः ।
पाशात्मकः पदार्थोऽयं पञ्चमः परिपठ्यते ।। १३ ।।

भुक्तिमुक्तिव्यक्तिफला क्रियादीक्षाह्वया परा ।
षष्ठोऽभिधीयते तन्त्रे पदार्थो मुनिपुंगवाः ।। १४ ।।

षट्स्वेतेषु पदार्थेषु शिवाद्यवनिपश्चिमम् ।
सर्वमन्तर्गतं यस्मात्परीक्ष्यन्ते नयेन ते ।। १५ ।।

लयभोगाधिकाराणां न भेदो वास्तवः शिवे ।
किंतु बिन्दोरणूनां च वास्तवा एव ते मताः ।। १६ ।।

यथार्कः पङ्कजं नित्यं बोधसंशोषणादिभिः ।
कर्मभिर्बोधकाद्याख्या लभतेऽत्र तथा शिवः ।। १७ ।।

उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः ।
तदा लयाह्वयं तत्त्वं शिवतत्त्वं तदेव हि ।। १८ ।।

विद्यादितत्त्ववन्नेदं संनतत्वादिलक्षणम् ।
किंतु स्वदृक्क्रियाशक्तिः किरणात्मकमव्ययम् ।। १९ ।।

व्यापकं नित्यमचलं सर्वतोमुखमैश्वरम् ।
यस्मिन् विस्पष्टचिन्मात्रो व्यापकत्वादिधर्मवान् ।। २० ।।

अनन्योऽन्यश्च तच्छक्तेः समवायात् स्थितः शिवः ।
शक्तोऽयं शक्तयो यस्मादुद्योगादिक्रियाच्युताः ।। २१ ।।

शिव एवावतिष्ठन्ते निष्कलश्च स एव च ।
उद्युक्तस्तु सदा कार्ये बिन्दुर्भोगाह्वयं तदा ।। २२ ।।

लभते शिव उद्युक्तः स एव च सदाशिवः ।
तत्त्वं स एव सादाख्यं न शिवाद् वस्तुतो भिदा ।। २३ ।।

भोगस्तत्पालनात्मैव नाध्यासस्तदसंभवात् ।
बिन्दुः प्रवृत्तकार्ये स्यादधिकारस्तदा यदा ।। २४ ।।

शिवस्य न भिदा पूर्वा विशेषस्य मुनीश्वराः ।
ईश्वरश्च स एव स्यात् तत्त्वं तच्चेश्वराह्वयम् ।। २५ ।।

प्रवृत्तोऽयमिति प्रोक्तः प्रवृत्ताः शक्तयो मताः ।

ऋषयः—

बिन्द्वस्थाविशेषेण शिवभेदस्त्वयोदितः ।। २६ ।।

बिन्दोरचेतनत्वेन प्रवृत्तिः स्वत एव न ।
कर्ता चेत् तत्प्रवृत्त्यर्थं विकारी स्यात् तदा शिवः ।। २७ ।।

एवं विरोध आपन्ने परिहारं वदेश्वर ।

ईश्वरः—

कर्तृत्वं द्विविधं विप्राः संकल्पात् कारणादपि ।। २८ ।।

न हि संकल्पमात्रेण कुलालैः क्रियते घटः ।
शिवः संकल्पमात्रेण बिन्दुः क्षोभकरो यतः ।। २९ ।।[1]

न व्यापारविशेषेण येनायं विकृतो भवेत् ।
समस्तोपाधिशून्यत्वात् निर्मलत्वाच्च हे द्विजाः ।। ३० ।।

य एवोपाधिमन्तस्ते विकृताः कार्यजन्मनि ।
ततश्च नाविकारित्वं कर्तृत्वेन विरुद्ध्यते ।। ३१ ।।[2]

---

[1] सदा S.P. [2] °त्वेनाविरुद्ध्यते Pr.

समस्तोपाधिशून्यत्वात् कर्तृत्वं नेष्यते कथम् ।
कर्तृत्वप्रतिबन्धत्वादुपाधेस्तद्वियोगतः ।। ३२ ।।

भवेत् प्रत्युत कर्तृत्वं प्राचुर्याय मुनीश्वराः ।
अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथा ।। ३३ ।।

यथार्को दिनचेष्टानां संनिधेरुपकारकः ।
तथा संनिधिमात्रेण विदधात्यखिलं शिवः ।। ३४ ।।

[1]अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथा ।
सदेहस्यापि कर्तृत्वं सर्वत्रापि यदीष्यते ।। ३५ ।।

तद्देहस्यापि कार्यत्वाद् व्याप्तं कर्त्रन्तरेण तत् ।[2]
तस्य देहादयोऽप्येवमित्यवस्था न कुत्रचित् ।। ३६ ।।

ततः प्रथमसृष्टेस्तु समस्तोपाधिवर्जितः ।
कर्ता महेश एवेष्टः प्रवृत्ताशेषशक्तिकः ।। ३७ ।।

लयादिकोऽप्वयं भेदः शक्तितस्तु ततः स्थितः ।
बिन्दुः क्षोभो यतः शंभोः शक्तेरेव प्रवर्तते ।। ३८ ।।

ज्ञानक्रियात्मिका सापि सत्या नित्योदितप्रभा ।[3]
सा पराभिमुखी सर्वबन्धलेशविवर्जिता ।। ३९ ।।

---

[1] तु Pr. [2] अत्रायं पाठक्रमः मुद्रितकोशे दृश्यते—
सदेहस्यापि कर्तृत्वं सर्वत्रापि यदीष्यते ।
तद्देहस्यापि कार्यत्वाद् व्याप्तं कर्त्रन्तरेण तत् ।।
तस्य देहादयोऽप्येवमित्यवस्था न कुत्रचित् ।
ततः प्रथमसृष्टेस्तु समस्तोपाधिवर्जितः ।।
कर्ता महेश एवेष्टः प्रकृताशेषशक्तिकः ।
यथार्को दिनचेष्टायां संनिधेरुपकारकः ।।
तथा संनिधिमात्रेण विदधात्यखिलं शिवः ।
लयादिभोगोऽप्ययं भेदः शक्तितस्तु ततः शिवः ।।
[3] नित्योदयप्रभा S.P.

अनन्यान्या [1]शिवात् सैव वस्तुतो मूर्तिरीश्वरी ।
[2]लयावस्था यदा प्राप्ता तदोदासीनरूपिणी ।। ४० ।।

कार्याभावादुदासीना साम्यावस्था तदैव हि ।
विज्ञानक्रिययोः साम्यं यस्मादुद्युक्तकर्तृषु ।। ४१ ।।

[3]तदा ह्येतत् करोमीति व्यापारे साम्यमेतयोः ।
अधिकारे [4]क्रियोद्युक्ता कार्येष्वधिकृता यतः ।। ४२ ।।

कार्यं च करणीयं तु गुणसंकल्पसंस्मृतिः ।
न तु व्यापार इत्युक्ता विभोस्तद्विषया स्मृतिः ।। ४३ ।।

तस्मात् सदाशिवो ज्ञाता ज्ञानरूप इति स्थितः ।
अनयोर्ज्ञानयोर्हेतुरविशेषात्मिका चितिः ।। ४४ ।।

शक्तिरुक्ता विकल्पा सा महती मूर्तिरैश्वरी ।

ऋषयः—

दीक्षायां भगवंस्तत्त्वं शिवाख्यं शोध्यमीरितम् ।। ४५ ।।

शान्त्यतीतकलाव्याप्तमिति चाद्य विरुद्धयते ।

ईश्वरः—

[5]चोदितं सत्यमेवैतद् वक्ष्ये यूयं समाहिताः ।। ४६ ।।

प्रकृतित्वादयं बिन्दुः क्षोभ्यते नाखिलात्मना ।
तत्र यः क्षुब्धभागोऽस्य शान्त्यतीतकला तु सा ।। ४७ ।।

शान्त्यादिभुवनात्मा यः परिणामस्तु बैन्दवः ।
शिवतत्त्वं तु तत्रोक्तं सादाख्यं भुवनं तु यत् ।। ४८ ।।

बैन्दवं तत्तु सादाख्यं तत्त्वमुक्तं शिवागमे ।
ऐश्वरं तदधस्तत्त्वं तदेवैश्वरमीरितम् ।। ४९ ।।

---

[1] शिवात्मैव S.P. [2] अयमर्धश्लोकः मुद्रितकोशे नोपलभ्यते ।
[3] ततो ह्येतत् Pr. [4] क्रियोद्रिक्ता Pr.
[5] चोदितं . . . . . कला तु सा इत्यन्तो भागः मुद्रितकोशे न दृश्यते ।

एतानि त्रीणि तत्त्वानि सन्ति तत्त्वात्मवर्त्मनि ।
एतान्येव तु शोध्यानि पूर्वोक्तानि न कुत्रचित् ।। ५० ।।

तानि प्राप्यानि[1] सर्वैस्तु दीक्षया योजितैर्नृभिः ।
योजिता लयतत्त्वे ये ते मुक्ता नापरत्र च ।। ५१ ।।

भोगाधिकारतत्त्वस्था व्यक्तचिन्मात्रशक्तयः ।
विन्दुनैव हि भिन्नोऽयं भक्तस्तु भुवनैरपि ।। ५२ ।।

[2]शान्त्यतीता च शक्तिश्च विद्यास्थितिनिवृत्तयः ।
भुवनानि महान्त्येषु संज्ञाः पञ्च लभेच्छिवः ।। ५३ ।।

ईशानपुरुषाघोरवामजातात्मिकाः क्रमात् ।
एताः सदाशिवावस्थाः भोगस्याननपञ्चकाः ।। ५४ ।।

पञ्चमूर्तिमयी शुभ्रा नित्या सकलनिष्कला ।
मूर्तिः सदाशिवी ज्ञेया सर्वकार्यप्रवर्तिका ।। ५५ ।।

ईशानशेखरी सा च पुंवक्त्रा घोरहृत्स्थला ।
वामगुह्या च सद्याङ्घ्री[3]हारिणी जननी तथा ।। ५६ ।।

रोधयित्रीति तिसृभिः शक्तिभिः कल्पितेन्द्रिया ।
अष्टावेता यशस्विन्यः ईशानाद्यास्नु[4] शूलिनः ।। ५७ ।।

आसां वीर्यं विभागश्च[5] स्वरूपेणोच्यते द्विजाः ।
ईशानी परमा काष्ठा शेखरत्वेन कल्पिता ।। ५८ ।।

जगत्पूरणहेतुत्वाद् विन्दोर्नादादिवृत्तिभिः ।
वक्त्रेण साम्यतस्तस्य पुमान् वक्त्रमितीर्यते ।। ५९ ।।

घोरो मलादिसंसारस्तद्विशोधयिता[6] प्रभुः ।
अघोर इति विख्यातः सद्भावोऽयं सलक्षणः ।। ६० ।।

---

[1] प्राप्याणि Pr. [2] शक्त्यतीतादि Pr. [3] सद्याङ्गी Pr.
[4] स्त्रिशूलिनः Pr. [5] विभावं च Pr. [6] विरोधितया Pr.

हृदयं चापि सद्भावो यस्मात् कस्मात् तदेव हि ।
[1]वामोऽस्य तु रहस्यत्वात् सूक्ष्मत्वाद् दृक्क्रियात्मकः ।। ६१ ।।

कर्ता विश्वस्य पुत्रादिकार्येषु जनकं यतः ।
वामो गुह्यस्ततश्चायं शास्त्रेऽस्मिन् संमतो बुधाः[2] ।। ६२ ।।

[3]स्वस्येच्छामात्रतस्तस्य स्वशक्तिप्रसरात्मिका ।
मूर्तिमासादयेद् यस्मात् सद्योमूर्तिस्ततः स्मृतः ।। ६३ ।।

एवं मन्त्रास्तु पञ्चैते यैर्निबद्धा[4] तनुः शिवा ।
वस्तुतस्तु न भिन्नास्ते यतो नान्ये स्वशक्तितः ।। ६४ ।।

अन्तरङ्गास्तथा चान्ये मन्त्राः सन्ति शिवात्मकाः ।[5]
हृच्छिरश्चूलिकावर्मलोचनास्त्राणि नामतः ।। ६५ ।।

सद्भावो हृदयं तस्य शिरः सर्वोच्छ्रितो गुणः ।
वशित्वमपराधीनं या शिखा सोपरि स्थिता ।। ६६ ।।

स्वभावगुप्तमन्येषां समर्थमपि गोपने ।
तेजः कवचसाधर्म्यात् तन्नाम्ना व्यपदिश्यते ।। ६७ ।।

सर्वज्ञताया यद् बीजं ततस्तेन निरीक्षणम् ।
योऽसावप्रसहः शंभोः प्रतापो हेतिरुच्यते ।। ६८ ।।

ऐश्वर्यं परमा काष्ठा नैजो गुण इतीष्यते ।
यस्मात् सा परमा काष्ठा व्याप्त्युत्कर्षात्मको गुणः ।। ६९ ।।

ऐश्वर्यं स्वामिता सर्वचिदचिद्वर्गयोर्द्वयोः ।
ऐश्वर्यं नात्र वशिता सा यस्मादीशितुः फलम् ।। ७० ।।

मन्त्रास्तु सर्व एवैते शक्तयः परमेष्ठिनः ।
नित्यसिद्धाश्च ताः प्रोक्ताः शक्तस्तद्योगतः शिवः[6] ।। ७१ ।।

---

[1] वामास्य तु Pr. [2] बुधैः Pr. [3] सर्गेच्छा Pr. [4] निबन्धा Pr.
[5] शिवात्मिकाः Pr. [6] प्रोक्ताः सदोच्यन्ते तु शक्तयः Pr.

[1]यदा कार्यप्रवृत्तास्तास्तदोच्यन्ते तु शक्तयः ।
शक्तिशक्तिमतोर्भेदः प्रसङ्गादेवमीरितः ।। ७२ ।।

शिवेन सात्मका एते मन्त्राभिन्नाणवो न च ।
हारिणी या शिवस्योक्ता सर्वाहरणशक्तिका ।। ७३ ।।

अथवा परसंस्थानं नयेदाहृत्य पुद्गलम् ।
यस्मात् तस्मादियं शक्तिर्हारिणीत्युच्यते बुधैः ।। ७४ ।।

जननी जगतो जन्म स्वभावस्यामितद्युतिः ।
रोधयित्र्यणुसंघस्य प्रलये नियमस्थितिम् ।। ७५ ।।

भोगेष्वपि च तस्यापि विदधाति यतस्ततः ।
एतास्तु शक्तयस्तिस्रः शरीरकरणात्मिकाः ।। ७६ ।।

नित्यसिद्धा विभोर्विप्राः यत एव स्वकं बलम् ।
शक्तीनां वस्तुतस्तासां स्थितिरीश्वरतत्त्वके ।। ७७ ।।

ईशः प्रवर्तको यस्मात् प्रवृत्तिः शक्तिभिर्यतः ।

ऋषयः——

भगवन् कथितः सम्यक् पदार्थः पतिसंज्ञितः ।। ७८ ।।
प्रमाणैरपि वक्तव्यो युक्तिबोध्या हि साधवः ।

ईश्वरः——

अचेतनं जगद् विप्राः चेतनप्रेरणं विना ।। ७९ ।।

प्रवृत्तौ वा निवृत्तौ वा न स्वतन्त्रं रथादिवत् ।
योऽत्र प्रवर्तकः शक्तः स पतिः परिपठ्यते ।। ८० ।।

नानैकान्तिकताहेतोः क्षीरे वत्सविवृद्धिदे ।
चेतनेन गवा यस्मात् प्रवृत्तं वत्सवृद्धिदम् ।। ८१ ।।

---

[1] यदेत्यर्धश्लोकः मुद्रितकोशे नोपलभ्यते ।

मृताद् देहात् प्रवर्तेत प्रवृत्तं स्यात् स्वतः पयः ।
न च प्रवर्तते यस्मात् चेतनापेक्षिता स्थिता ।। ८२ ।।

नाप्ययस्कान्तदृष्टान्तः साधकोऽचित्प्रवर्तने ।
अयस्कान्तोऽपि योक्तारमपेक्ष्यैव प्रवर्तकः ।। ८३ ।।

किंच पक्षीकृतः सोऽपि जडः सन् यः प्रवर्तते ।
स्वप्रवृत्तौ परापेक्षमचेतनमतः स्थितम् ।। ८४ ।।

ऋषयः——

एवं चेत् चेतनाः सन्ति पुरुषाः सर्वसंमताः ।
तेषामेवास्तु कर्तृत्वं किमन्येन वदेश्वर ।। ८५ ।।

ईश्वरः——

अज्ञो जन्तुरनीशोऽयमात्मा यस्माद् द्विजर्षभाः ।
सोऽपि सापेक्ष एव स्यात् स्वप्रवृत्तौ घटादिवत् ।। ८६ ।।

इष्यते स कथं कर्ता कर्ता तस्मान्महेश्वरः ।
विमुक्तास्तर्हि कर्तारो भवेयुरिति चेन्मतिः ।। ८७ ।।

किमादिमुक्तः स्यात् कर्तानादिमुक्तोऽथवा द्विजाः ।
अनादिमुक्तश्चेत् कर्ता सिद्धसाधनता तदा ।। ८८ ।।

आद्यश्चेन्मुक्तिदस्तस्य कर्ता प्रागेव सिद्ध्यति ।
अन्यथायं कथं मुक्तो बद्ध एव सदा भवेत् ।। ८९ ।।

न मोक्षं [1]यान्ति पुरुषाः स्वसामर्थ्यात् कदाचन ।
मुक्त्वा प्रसादं देवस्य शिवस्याशिवहारिणः ।। ९० ।।

किंचानुमानमत्रान्यच्छ्रूयतां द्विजसत्तमाः ।
विवादाध्यासितं विश्वं विश्ववित् कर्तृपूर्वकम् ।। ९१ ।।[1]

कार्यत्वादावयोः सिद्धं कार्यं कुम्भादिकं यथा ।
कार्यता चास्य विश्वस्य स्वभावत्वात् घटादिवत् ।। ९२ ।।

---

[1] याति पुरुषः Pr.

व्योमादिरपि सांशोऽपि सगुणत्वाद् यथा घटः ।
[1]विवादाध्यासितं तस्मात् जगत्कर्तृपुरःसरम् ।। ९३ ।।

पतिज्ञानैकगम्योऽयं पतिस्तद्धेतुरेव च ।
तन्त्रान्तरे तु ये सिद्धाः पशवो व्याप्त्यभावतः ।। ९४ ।।

शोध्या बोध्याश्च ते येन पशुत्वस्य व्यवस्थितेः ।
पतिरेवं समुद्दिष्टस्त्रितत्त्वोक्तिनिदर्शनात् ।
पदार्थः कुण्डलिन्याख्यः कथ्यतेऽनन्तरं द्विजाः ।। ९५ ।।

इति श्रीपौष्करागमे ज्ञानपादे पतिनिरूपणं
नाम प्रथमः पटलः

—— ० ——

द्वितीयः पटलः

—— ० ——

अथ बिन्दोर्विवेकोऽयं न्यायप्राप्तोऽत्र वर्ण्यते ।
लयादिभेदः प्रागुक्तो यदुपाधौ शिवस्य तु ।। १ ।।

स विन्दुरिति मन्तव्यः सैव कुण्डलिनी मता ।
किंच रुद्राणवो येन वद्ध्यन्ते यत्र वा स्थिताः ।। २ ।।

विमुच्यन्ते यतो वायं स बिन्दुरिति गम्यताम् ।
किंच सादात्मको योगः सद्यः संजायते यतः ।। ३ ।।

वर्तते लीयते यत्र स बिन्दुरिति गण्यते ।
नात्र शक्तिरुपादानं चिद्रूपत्वाद् यथा शिवः ।। ४ ।।

परिणामोऽचितः प्रोक्तश्चिद्रूपस्य न युज्यते ।
चितो विवर्त एवेष्टस्तथात्वे कार्यशून्यता ।। ५ ।।

---

[1] विश्वकर्तृपूर्वकम S.P.

चिद्विवर्तस्तथासत्योऽद्वैतवादिभिरिष्यते ।
सर्वप्रमाणसंसिद्धं चिद्विवर्तं कथं जगत् ।। ६ ।।

मायापि नात्रोपादानं मोहकत्वात् स्वतेजसः ।
यतः प्रबुद्धपुंकायकरणानां न कारणम् ।। ७ ।।

शुद्धाध्ववर्तिनः सर्वे प्रबुद्धाः शिवतेजसा ।
देहेन्द्रियादिमन्तोऽपि नाबुद्धास्तेषु ते पुनः ।। ८ ।।

किंच कर्मोज्झिताः सर्वे पुद्गलाः शुद्धवर्त्मनि ।
कथं कर्मानुसारेण मायापरिणता सती ।। ९ ।।

तेषां देहेन्द्रियादीनामुपादानं भवेद् द्विजाः ।
तस्माच्छुद्धाध्वनश्चास्य स्वानुकार्येव कारणम् ।। १० ।।

इष्यतां कुण्डलिन्याख्यं शुद्धमेतद् द्विजोत्तमाः ।
सा च कुण्डलिनी शंभोः शक्तिः शुद्धा जडात्मिका ।। ११ ।।

न तादात्म्यात् स्थिता किंतु वर्तमाना परिग्रहे ।
शिवे कर्तरि तादात्म्यात् नेयं कुण्डलिनी स्थिता ।। १२ ।।

उपादानत्वतो हेतोः कुलाले मृत्तिका यथा ।
किंच मायाद्युपादानं देहेन्द्रियवतां नृणाम् ।। १३ ।।

क्षुब्धं कार्यकरं तस्य कर्तुर्देहेन्द्रियादिकम् ।
यदुपादानतो जातं स बिन्दुरिति गम्यताम् ।। १४ ।।

किंच शब्दानुसंविद्धाः जायन्ते प्रत्यया नृणाम् ।
न ह्यकारणकाः शब्दाः संभवेयुः कदाचन ।। १५ ।।

तेषां यत् कारणं विप्राः स बिन्दुर्बहुवृत्तिकः ।
न चात्र शब्दतन्मात्रं तत् तेषां व्यञ्जकं यतः ।। १६ ।।

यद् व्यञ्जकं न तद् व्यङ्ग्यं सुप्रसिद्धा तयोर्भिदा ।
किंचोर्ध्वभावितत्वेष विकल्पाः प्रत्ययाः कथम् ।। १७ ।।

जायेरन् विन्दुवैचित्र्यमन्तरा मुनिपुंगवाः ।
सर्ववादिषु संसिद्धा बुद्धिरध्यवसायिनी ।। १८ ।।

न स्यादध्यवसायोऽपि विना शब्दानुवेधनम् ।
न शब्दप्रभवः शब्दः तन्मात्रस्य स्थितेरधः ।। १९ ।।

तस्माद् बैन्दव एवेष्टः शब्दः सांख्यात्मनामपि ।
शब्दाश्चतुर्विधास्तेऽपि वैखर्यादिविभेदतः ।। २० ।।

वैखरी मध्यमाख्या च पश्यन्ती सूक्ष्मसंज्ञिता ।
वैखरी श्रोत्रविषया स्थूलवर्णपरिग्रहा ।। २१ ।।

स्थानेषु विधृते वायौ प्रयोक्तुरुपकारिणी ।
बुद्ध्या वर्णानुसंधानपूर्वमर्थस्य वाचिका ।। २२ ।।

प्राणवृत्तिमतिक्रान्ता वागेषा मध्यमाह्वया ।
वर्णरूपानुसंधानविरहान्तः समुज्ज्वला ।। २३ ।।

मायूराण्डरसो यद्वन्निर्विशेषार्थधारिका ।
पश्यन्ती वागियं ज्ञेया तृतीया शिवशासने ।। २४ ।।

सूक्ष्मा चिदेकशरणा निवृत्ताशेषशक्तिका ।
वैखर्याः कारणं मध्या पश्यन्ती मध्यमां प्रति ।। २५ ।।

पश्यन्त्याः कारणं सूक्ष्मा निर्विकल्पस्वरूपिणी ।
एताश्च वृत्तयोऽणूनां चतस्रः प्रत्ययात्मिकाः ।। २६ ।।

अन्तरेऽवस्थितास्तिस्रो बहिरन्या व्यवस्थिता ।
आगोपाङ्गनाबालं म्लेच्छाः प्राकृतभाषिणः ।। २७ ।।

अन्तर्जलगताः सत्त्वाः नित्यं जल्पन्ति ता गिरः ।
आभ्यो न परमो बन्धः आभ्यो मुक्तिस्तु नापरा ।। २८ ।।

तन्निवृत्त्यविनाभूतो दृक्क्रियावारको यतः ।
वियुक्तान् मन्वते तेभ्यः पुद्गलाः स्वान्न कुचित् ।। २९ ।।

सुख्यहं दुःख्यहं चेति मतिर्या शब्दताडिता ।
सूक्ष्माः शुद्धाध्वनि गिरः स्थूला मिश्राध्वनि स्थिताः ।। ३० ।।

अशुद्धाध्वनि ता वाचः स्थिताः स्थूलेतराः सदा ।
अन्याश्च वृत्तयो विन्दोः निवृत्त्यादिफलात्मिकाः ।। ३१ ।।

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
शान्त्यतीता च पञ्चैताः शुद्धमार्गे पुरात्मिकाः ।। ३२ ।

मिश्राः शुद्धाध्वनोरेताः तत्त्वाद्याधारिकाः स्थिताः ।
वस्तुरूपाः कला ज्ञेयाः शब्दरूपाः पुरोदिताः ।। ३३ ।।

शब्दवस्तूभयात्मासौ विन्दुर्नान्यतरात्मकः ।
वृत्तिस्तत्त्वात्मिका चास्य चतुर्धा संव्यवस्थिता ।। ३४ ।।

शिवतत्त्वं सदेशाख्यमैशं विद्याह्वयं तथा ।
शुद्धान्येतानि तत्त्वानि रुद्राणूनां महात्मनाम् ।। ३५ ।।

विचित्रपुरमालाभिः खचितानि महान्ति च ।
दिव्यस्त्रीभिर्महाश्चर्यैर्भोगैर्दुःखविवर्जितैः ।। ३६ ।।

तनुभोगेन्द्रियाद्यैश्च खचितान्युन्नतानि च ।
भोगाधिकारयोः शक्तिरभिव्यक्तेह दीक्षया ।। ३७ ।।

येषां तेषां तु भोगार्थं शिवेन परिकल्पितम् ।
तत्त्वं सदाशिवं तद्वत् शिवतत्त्वं च निर्मितम् ।। ३८ ।।

भोगतत्त्वे स्थितिर्यस्मात् वस्तुतस्तत्त्वयोर्द्वयोः ।
व्यक्ताधिकारशक्तीनां भोगार्थं तत्त्वमैश्वरम् ।। ३९ ।।

तत्त्वं विद्याह्वयं किंतु पुंसां स्थूलाधिकारिणाम् ।
विद्यानां वेदने हेतुर्विद्येति परिपठ्यते ।। ४० ।।

नैतत् पश्वात्मनां विश्वं शुद्धवर्त्म व्यवस्थितम् ।
दुःखसंपूर्णताहेतोः तस्मात् तत्त्वं निबन्धनम् ।। ४१ ।।

यथा माया ततश्चैतच्छुद्धवर्त्मनिबन्धनम् ।
नैष बन्धो विशेषाध्वा भोक्तुरिच्छानुसारतः ।। ४२ ।।

भोग्यत्वादीदृशं यद्वद् दृष्टं तत्तन्निबन्धनम् ।
यथा शिवस्य भोगाख्यं तस्मात् तत्त्वं न बन्धनम् ।। ४३ ।।

किंच कर्मान्वयाभावाच्छुद्धाध्वा नो निबन्धकः ।
यत्र कर्मान्वयाभावाच्छुद्धवर्त्मनि च द्विजाः ।। ४४ ।।

भोगोऽत्रेच्छानुसारित्वात् कर्म नेच्छानुसारतः ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।। ४५ ।।

ऋषयः—

कथं कर्मान्वयाभावः शुद्धवर्त्मनि वर्तिनाम् ।
शुद्धाध्वनि महाभोगः कर्म नास्तीति चोदितम् ।। ४६ ।।

कथं तद्वर्तिनां भोगो विचित्रस्तद्वदेश्वर ।

ईश्वरः—

न कर्मभोगवैचित्र्ये कारणं शुद्धवर्त्मनि ।। ४७ ।।

मलस्य परिपाको यो विचित्रः सोऽत्र कारणम् ।
यस्य प्रकृष्टस्तत्पाको भोगतत्त्वे स भोगभाक् ।। ४८ ।।

इतरस्त्वीशविद्याख्यतत्त्वयोर्भोगभाग्भवेत् ।
किं कर्मणात्र विप्रेन्द्राः यत्रेच्छाभोग इष्यते ।। ४९ ।।

भवेदेव मलस्यास्य परिपाको भवेत् स्वतः ।
भोगेन तु विपाकोऽस्य भोगो नाकर्मणा स च ।। ५० ।।

विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मणः क्षये ।
तत्कर्मायत्तदेहादेः क्षयात् तद् भोक्तृताक्षयः ।। ५१ ।।

मलोऽपि पक्व एषोऽस्मात् सहकारिवशाद् द्विजाः ।
परिपाकः समस्तेषां सर्वेषामपि शंकरः ।। ५२ ।।

स्वेच्छयैवाधिकारेषु विचित्रेषु नियोजयेत् ।
स्वेच्छैव कारणं तत्र वैचित्र्ये कर्म न द्विजाः ।। ५३ ।।

नैवेह शंभोर्नैर्घृण्यं भवतीह कदाचन ।
दुःखेषु हि नियुञ्जानो निर्घृणो नापरत्र च ।। ५४ ।।

शुद्धाध्वनि सुखात्मैव भोग एवं स च स्मृतः ।
इच्छानुल्लङ्घ्य महिमा महेशस्य महात्मनः ।। ५५ ।।

कर्मादिनैरपेक्ष्येण मलपाकानुसारतः ।
अनुगृह्णाति विज्ञानकेवलानपरानपि ।। ५६ ।

ऋषयः——

अध्वायं भोग्य उद्दिष्टो भोगो रागादिभिः स्थितः ।
अत्र तेषामभावेन कथं भोगो महेश्वर ।। ५७ ।।

ईश्वरः——

अत्रापि कालमुख्यानि सन्ति तत्त्वान्यथो यथा ।
किंतु तान्यत्र शुद्धानि बैन्दवानि द्विजोत्तमाः ।। ५८ ।।

कलादितत्त्वसंयोगात् सकलत्वमणोः स्थितम् ।
तेषामपि ह्यसद्भावे सकला अकला अपि ।। ५९ ।।

तेषां लयादिभोगेऽपि पारतन्त्र्यं कृतं न तैः ।
विज्ञानकेवलास्तस्मात् सकला अकला अपि ।। ६० ।।

एवं बिन्दुः समासेन व्याख्यातो वृत्तिभिः सह ।
मायां तदनु विप्रेन्द्राः शृणुध्वं युक्तिभिः सह ।। ६१ ।।

इति श्रीपौष्करागमे ज्ञानपादे

बिन्दुनिरूपणं नाम द्वितीयः पटलः

—— ० ——

तृतीयः पटलः

—— ० ——

अथ माया क्रमायाता समासादुपवर्ण्यते ।
मयत्यस्माद् जगद्विश्वं माया येन समीरिता ।। १ ।।

नित्यैका व्यापिनी वस्तुरूपा कर्माश्रया शिवा ।
साधारणी च सर्वेषां सकलानां मुनीश्वराः ।। २ ।।

प्रलये लीनदेहस्य कर्मिणोऽणोरहर्मुखे ।
देहादेः कारणं माया सूक्ष्मस्थूलात्मकस्य तु ।। ३ ।।

कलादिक्षितिपर्यन्तमविभक्तिपुरःसरम् ।
विभक्तत्वाद् यथा बीजे स्कन्धपर्णफलादिकम् ।। ४ ।।

न च गौणमुपादानं त्रिगुणानां विभागता ।
गुणा विभागरूपा तु प्रकृतिर्न दृगन्तरे ।। ५ ।।

गुणा विभागरूपा सा सिद्धान्ते प्रतिपादिता ।
दर्शनान्तरदृष्टत्वातः तया न समर्चिता ।। ६ ।।

तन्मात्राणि पृथिव्यादेः सूक्ष्माण्येभ्यस्त्वहंकृतिः ।
तस्याः सूक्ष्मतरा बुद्धिस्तस्याः प्रकृतिरेव च ।। ७ ।।

तस्याः कलादिवर्गश्च माया सूक्ष्मतरा ततः ।
यत्र सौक्ष्म्यपराकाष्ठा सा मायेत्यभिधीयते ।। ८ ।।

मायैषा वस्तुरूपैव कलादिजननी यतः ।
कलादिरिह वस्त्वात्मा वस्त्वात्मा न ह्यवस्तुजः ।। ९ ।।

न हि प्रपञ्चो वस्त्वात्मा प्रमाणानामभावतः ।
प्रमेयाभावतस्तद्वत् संबन्धाभावतोऽपि च ।। १० ।।

प्रपञ्चोऽयं प्रमात्रादिभेदात्मा नाक्षगोचरा ।
यतः प्रत्यक्षमर्थानां विधातृ न निषेधकम् ।। ११ ।।

निषेधमन्तरा भेदो न समस्ति कदाचन ।
तस्मात् प्रपञ्चसद्भावे प्रत्यक्षं न तु साधकम् ।। १२ ।।

व्याप्तेस्तत्पूर्वकत्वेन नानुमानमपि प्रमा ।
प्रत्यक्षादिविरुद्धेऽर्थे[1] नागमस्य प्रमाणता ।। १३ ।।

तस्मात् प्रमेयाभावोऽपि प्रमाणाभावतः स्थितः ।
अस्तु मानं प्रमेयं च संबन्धो दुर्लभस्तयोः ।। १४ ।।

न तावज्ज्ञानघटयोः योगस्तादात्म्यलक्षणः ।
ज्ञानस्याभ्यन्तरत्वेन घटश्चाभ्यन्तरो भवेत् ।। १५ ।।

नोत्पाद्योत्पादकात्मापि स्वप्नेऽप्यर्थस्तु सन् भवेत् ।
एवं प्रपञ्चावस्तुत्वे[2] वस्तु माया कथं भवेत् ।। १६ ।।

अस्ति प्रमाणसद्भावे प्रपञ्चस्य पुरातनम् ।
प्रत्यक्षं[3] तावदर्थानां प्रमाणं भेदगोचरम् ।। १७ ।।

स्थाणुर्वा पुरुषो वेति संदेहे स्थाणुरेव सः ।
पुरुषो नेति भेदात्मा दृश्यन्ते प्रत्ययोऽक्षतः ।। १८ ।।

भ्रमोऽयं सविकल्पत्वाद् रज्जुवन्नेष्यतामिति ।
सर्वेषां सर्वदा कुम्भः कुम्भ एवेष्यते सतः ।। १९ ।।

नैवं रज्जुः कदाचित्तु यतः सर्पायते नृणाम् ।
मालायते तदन्येषां नैवं कुम्भपटादयः ।। २० ।।

किंचाहि[4]रज्ज्वोः साम्येन [5]भ्रान्तिरत्रोपपद्यते ।
[5]चितो घटादिरूपेण प्रतीतौ का समानता ।। २१ ।।

निर्विकल्पाक्षबोधेऽपि भेदात्मा प्रत्यवस्थितः ।
अन्यथोत्तरविज्ञानं व्यावृत्तं नोपजायते ।। २२ ।।[6]

---

[1] विरुद्धार्थे Pr. [2] प्रपञ्चोऽवस्तुत्वे Pr. [3] तु पदार्थानां Pr.
[4] रज्जुसाम्येन Pr. [5] नोपजायते Pr. [6] चितोर्घटादि Pr.

अगृहीतार्थभेदस्य तन्नामादिविशेषवत् ।[1]
किंच येन प्रमाणेन प्रपञ्चाभाव उच्यते ।। २३ ।।

[2]तत्प्रमाणं प्रमाणं तन्नवेति परिचिन्त्यताम् ।
प्रमाणं चेत् प्रपञ्चोऽस्ति तत्तदन्तर्गतं यतः ।। २४ ।।

यद्यप्रमाणं सुतरां भावरूपं जगद् भवेत् ।
संबन्धो ज्ञानघटयोः ज्ञाप्यज्ञापकलक्षणः ।। २५ ।।

एवं वस्त्वात्मकं विश्वं भवेत् कथमवस्तुजम् ।
तस्माद् वस्त्वात्मिका माया स्थिता विश्वस्य कारिणी ।। २६ ।।

नित्यैषाशेषकार्याणां कारणत्वाद्यदन्यथा ।
न तन्नित्यं यथा तन्तुस्तस्मान्मायाप्यनश्वरा ।। २७ ।।

अनित्यैषा [3]यदीष्येत कर्मणां कुत्र संस्थितिः ।
[4]न बिन्दुः कर्मणां स्थानं बिन्दुः कर्मोत्तरो यतः ।। २८ ।।

न चात्मनि स्थितिस्तेषां यस्मादात्मा जडो भवेत् ।

ऋषयः——

कानीह तानि कर्माणि किं तैरत्र प्रयोजनम् ।। २९ ।।

प्राकृतान्येव तान्याहुरन्यानीति तथापरे ।
तत्सर्वं कथयेशान संदेहोऽस्माकमीश्वर ।। ३० ।।

ईश्वरः——

अविशिष्टे तु भोक्तृत्वे भुञ्जते दिवि केचन ।
केचनावीचिमुख्येषु न स्यादेतदहेतुकम् ।। ३१ ।।

यत्तत्र[5] हेतुः कर्मेति मन्तव्यं मुनिपुंगवाः ।
उभयोः कृषिसाम्ये तु कश्चिद् धान्यानि यच्छति[6] ।। ३२ ।।

---

[1] विशेषतः Pr. [2] तक्प्रमाणमप्रमाणं वा Pr. [3] यदीक्ष्येत Pr.
[4] बिन्दुकर्मणां Pr. [5] हेतुकर्मेति Pr. [6] गच्छति S.P.

न किंचिदपरस्तस्य कर्मकारणकं द्विजाः ।
न चात्र प्रकृतिर्हेतुर्भोग्यत्वेन विरोधतः ।। ३३ ।।

यद् भोग्यं भोजकं चैकं[1] तस्मात् कर्मान्यदिष्यताम् ।
प्रकृतेः परिणामो यो बौद्धो भावाष्टकात्मकः ।। ३४ ।।

स यात् कर्मात्मकोऽन्यस्तु भोग्यः स्यादिति चेन्मतिः ।
तदप्यसारं भावानां प्रत्ययात्मकता यतः ।। ३५ ।।

प्रत्ययास्ते च विविधाः दृश्यन्तेऽणुषु सर्वदा ।
न समास्तत्र केनापि हेतुना भाव्यमग्रजाः ।। ३६ ।।

न च स्वयं स्ववैविध्ये हेतवस्त्वनवस्थितेः ।
किंचैते सर्वसामान्याः पुंसो निष्कर्मकानपि ।। ३७ ।।

मायाविचित्रसंसृष्टौ भवेयुः कारणं कथम् ।
प्रकृतेः परिणामोऽयं चित्रस्वाभाविकस्तु चेत् ।। ३८ ।।

अस्तु स्वाभाविकश्चित्रः परिणामः प्रधानजः ।
विचित्रपरिणामोऽपि न हि स्वाभाविकस्य तु ।। ३९ ।।

अस्य प्रवृत्तिः स्वाभाव्ये निवृत्तिस्तत्क्रिया कथम् ।
प्रवृत्तिश्च निवृत्तिश्च विरुद्धे ह्येकधर्मिणी ।। ४० ।।

अग्नेः प्रकाशः स्वाभाव्यो नाप्रकाशोऽपि तत्कृतः ।
प्रवृत्तिश्च निवृत्तिश्च न स्वतः किंतु कारणात् ।। ४१ ।।

[2]यदत्र कारणं कर्म तस्मान्नाकस्मिकं जगत् ।
[3]किंच यो यत् स्वभावस्तु धर्मः सोऽस्य सदा भवेत् ।। ४२ ।।

अस्ति प्रकाशमानोऽपि यथा दाहं करोत्यपि ।
तदेवं प्रकृतौ स्यातां प्रवृत्तिविनिवर्तने ।। ४३ ।।

ऋषयः—

---

[1] नैतत् Pr. [2] यत् तत्र Pr. [3] किं च यस्यस्वभावो यो Pr.

अष्टौ धर्मादयो भावाः विरुद्धास्तु परस्परम् ।
गुणाः सत्त्वादयश्चैवमेककारणिकः कथम् ।। ४४ ।।

ईश्वरः—

न विरुद्धास्तु धर्माद्या यतस्ते प्रत्ययात्मकाः ।
ज्ञानाभावोऽत्र नाज्ञानमन्यथा ज्ञानमेव तत् ।। ४५ ।।

तस्माज्ज्ञानविशेषास्ते सर्वे धर्मादयः स्थिताः ।
न विशेषास्तु सामान्या विरुद्धा हि कदाचन ।। ४६ ।।

[1]न चेह सत्त्वतमसी विरुद्धे स्तः कदाचन ।
यथावद् बोधकं सत्त्वमन्यथा बोधकं तमः ।। ४७ ।।

बोधकत्वाविशेषान्न विरोध इति चोदितम् ।
न कदाचित् तमः कार्यमज्ञानं तु मलाद्यतः ।। ४८ ।।

ततो न कुत्रचित् किंचित् स्वभावेन विरुद्धयोः ।
कार्ययोः कारणं तस्माद् विरोधः[2] कारणान्तरात् ।। ४९ ।।

कारणं तच्च कर्मैव तदपीश्वरचोदितम् ।
ततः स्वभाववादोऽयं भ्रान्तिमूल इति स्थितः ।। ५० ।।

न च मायामलस्तस्माद्यतः कार्या प्रकाशिका ।
कार्यात् प्रकाशकं यत्तु स्वात्मनाजनकं [3]न तत् ।। ५१ ।।

यथा प्रकाशकौ दृष्टौ वह्निदीपावुभावपि ।
न दीपकारणं वह्निः क्वचिदप्यप्रकाशक[4]: ।। ५२ ।।

न च मायास्वरूपेण पुंसां कार्यकरी स्थिता ।
कार्यैरणूपकारित्वाद् यदित्थं तन्न चात्मना ।। ५३ ।।

---

[1] न चात्र Pr. [2] विरुद्धं Pr. [3] ना जनकं Pr. स्वात्मनाच्छादकं S.P.
[4] प्रकाशितः Pr.

यथा तन्तुः स्वकार्येण पटेनैव न चात्मना ।
एकस्मिन् भुज्यमाने तु कर्मण्यन्यदुपस्थितम् ।। ५४ ।।

बाधकं प्रबलं तच्चेदविरोधे समुच्चयः ।
भुज्यमाने तु मानुष्ये शुनो योनिर्यदा भवेत् ।। ५५ ।।

बाधिका प्रबला सा चेन्मानुष्यस्य द्विजोत्तमाः ।
अविरुद्धा यतः प्राप्तिर्यदि तत्र समुच्चयः ।। ५६ ।।

आरब्धमप्यनारब्धं बलेन तु समं यदि ।
आरब्धमेव भोग्यं स्याद् रोधयित्र्या निरोधनात् ।। ५७ ।।

विरुद्धयोर्यदारम्भः कर्मणोः समयोर्बलात् ।
तदेव शक्तिपातेन नाश एव तयोर्भवेत् ।। ५८ ।।

न चात्मनि स्थितिस्तेषां कर्मणामुपपद्यते ।
कृष्यादिवत् प्रधानस्य संस्कारोत्पादकत्वतः ।। ५९ ।।

मायायामेव नान्यस्मिन् संस्थितानि द्विजर्षभाः ।
[1]मायातो द्विविधा सृष्टिः स्थूला सूक्ष्मात्मिकेत्यपि ।। ६० ।।

दृक्शक्तिव्यञ्जिका सूक्ष्मा स्थिता तत्त्वात्मनात्मनि ।
स्थूला भुवनरूपेण शरीराद्यात्मना स्थिता ।। ६१ ।।

सूक्ष्मा कलादयः पूर्वं स्थूला बध्नन्त्यणूंस्ततः ।
मायामण्डलमध्यस्थाः पुमांसः सकला मताः ।। ६२ ।।

अनुग्राह्यास्त्वमी साधिकरणेन शिवेन च ।
विद्यामण्डलिनश्चाष्टौ क्रौधादीन् श्रीगलं तथा ।। ६३ ।।

शतरुद्रांश्च वीरेशमपि तान् परमेश्वरः ।
स्वयमेवानुगृह्यादावधिकारे नियुक्तवान् ।

---

[1] मायायाः Pr.

एवं समासतः प्रोक्ता माया विश्वजगन्मयी ।। ६४ ।।

इति श्रीपौष्करागमे ज्ञानपादे
मायानिरूपणं नाम तृतीयः पटलः

—— ० ——

चतुर्थः पटलः

—— ० ——

ईश्वरः——

पशुः पशुत्वसंयोगात् न मुक्तः पशुरुच्यते ।
यस्मात् स्वदृक्क्रियाशाली कलाहीनोऽप्यनीश्वरः ।। १ ।।

व्यापकश्चिन्मयः सूक्ष्मः शिववत् संव्यवस्थितः ।
पशवस्त्रिविधा ज्ञेयाः सकलः प्रलयाकलः ।। २ ।।

[1]विज्ञानाकल इत्येषां शृणुध्वं लक्षणं क्रमात् ।
मलोपरुद्धदृक्शक्तिस्तत्प्रसृत्यै कलादिमान् ।। ३ ।।

भोगाय कर्मसंबन्धः सकलः परिपठ्यते ।
प्राग्वन्निरुद्धदृक्शक्तिः कर्मपाकात् कलोज्झितः ।। ४ ।।

कर्मणैष्यत्कलायोग्यो यः स च प्रलयाकलः ।
मलोपरुद्धशक्तित्वाच्छून्य[2]कल्पः स्वदृक्क्रियः ।। ५ ।।

तृतीयः पठ्यते तन्त्रे नाम्ना विज्ञानकेवलः ।
मायादावुदरे चान्ते क्रमेणैषां व्यवस्थितिः ।। ६ ।।

अवस्थानं च बन्धेन लक्ष्यतेऽणोर्विभुत्वतः[3] ।

ऋषयः——

विज्ञानकेवलाणूनां बन्धस्तु मल एव हि ।। ७ ।।

---

[1] विज्ञानकल° Pr. [2] सून्यकल्पः Pr. [3] स्वतः स्थितिः Pr.

मलस्य व्यापकत्वेन मायान्ते संस्थितिः कथम् ।

ईश्वरः—

भद्रं विप्रा महाप्राज्ञाः शुद्धाध्वा यः पुरोदितः ।। ८ ।।

भोक्ष्यमाणतया तस्य भुक्तत्वेनेतरस्य च ।
[1]अर्थादेव स्थिता मध्ये प्रोक्ता विज्ञानकेवलाः ।। ९ ।।

विज्ञानकेवलाः साक्षात् त एव मुनिपुंगवाः ।
शुद्धाध्ववर्तिनः [2]पश्चाद् भविष्यन्ति शिवेच्छया ।। १० ।।

अणोर्नियामकत्वेन मायावच्छुद्धवर्त्मनः ।
तद्वर्तिनो न सकलाः किंतु विज्ञानकेवलाः ।। ११ ।।

अधिकारमलोपेताः शिवेच्छानुमताः सदा ।
विज्ञानकेवलानां तु सिद्धौ युक्तिरिहोच्यते ।। १२ ।।

कलातत्त्वान्तरोधिन्या दीक्षया ज्ञानतोऽपि वा ।
योगेन भोगतो[3] वापि संन्यासाद् वा परिक्षयेः[4] ।। १३ ।।

कर्मणां तु तदायत्तमायायाश्च परिक्षयात् ।
मल एकोऽ[5]वशिष्टः स्यात् तस्माद् विज्ञानकेवलाः ।। १४ ।।

बौद्धादिदृष्टिमुक्तानां कैवल्यमपि नेष्यते ।
यतस्तद् बुद्धितत्त्वोर्ध्वकर्मणामपरिक्षयः ।। १५ ।।

सकला एव ते ज्ञेया कलायोगो यतः स्थितः ।
एवमेवाणवो युक्तिसिद्धाः प्रलयकेवलाः ।। १६ ।।

तत्त्वानामुपसंहारे प्रलयात् कर्मणोऽथवा ।
त्यक्तसूक्ष्मबहिर्देहा एष्यद्भागनिबन्धनैः ।। १७ ।।

अपक्वैः कर्मभिर्युक्ता इष्यतां प्रलयाकलाः ।
सकलास्तु कलायोगात् सूक्ष्मा स्थूला च सा द्विधा ।। १८ ।।

---

[1] अर्थादिव्यवस्थिता Pr. [2] साक्षात् Pr. [3] वाथ Pr.
[4] क्षये Pr. [5] ऽविशिष्ट Pr.

प्रतिपुंनियतं तत्त्वं कलाद्यवनिपश्चिमम् ।
स्वेच्छयैवानुगृह्णाति प्रलयाणूनपीश्वरः ।। १९ ।।

ऋषयः—

अथ कर्मसमत्वेऽणोरनुग्रह इहेष्यते ।
कर्मसाम्यं च भोगेन कथमेषामनुग्रहः ।। २० ।।

ईश्वरः—

समत्वं कर्मणां चात्र निमित्तं तदनुग्रहे ।
परिपाके मलस्येव किं त्वनुग्रहकारणम् ।। २१ ।।
किंचैष्यद् भोगहेतूनि सति येषामनुग्रहे ।
[1]न ते शिवस्य विषयाः किंतु पक्वाः स्वकर्मणाम् ।। २२ ।।
सर्वत्र कर्मसाम्यं तु यद्यनुग्रहहेतुना ।
विज्ञानकेवलानां तु भवेत् कथमनुग्रहः ।। २३ ।।
सकलानां[2] तु सर्वत्र कर्मसाम्यं न कारणम् ।
यतः कर्मसमत्वेऽपि तदन्येषां तु कर्मणाम् ।। २४ ।।
अपाके परमेशाज्ञा विरुद्धान्यप्रदा स्थिता ।
कर्मणोऽप्यस्य साम्ये वा पक्वे तदितरेऽपि च ।। २५ ।।
तं प्रत्यैवैश्वरी शक्तिरुपसर्पति तच्छिदे[3] ।
अनुग्रहे ततो नेष्टं तत्साम्यं मुनिपुंगवाः ।। २६ ।।
कर्मेह त्रिविधा दृष्टादृष्टजन्मोपभोग्यकम् ।
तथा नियतकालोपभोग्यं चेति समासतः ।। २७ ।।
आयुर्योगो गलूच्यादिसिद्धो मन्त्रप्रभावतः ।
तज्जन्मन्येव फलदो[4] दृष्टभोग्यं तदुच्यते ।। २८ ।।

---

[1] अर्धश्लोकोऽयं मुद्रितकोशे नोपलभ्यते । [2] च Pr. [3] चिते Pr.
[4] दृष्टं भोग्यं Pr.

[1]स्वाराज्यावीचिभोग्यौ यौ देहान्ते पुण्यपाप्मनोः ।[2]
अदृष्टं वेदनीयं यत् कर्मोक्तं शिवदर्शने ।। २९ ।।

अश्वमेधो द्विजवधः [3]कृतकालेन भोगदः ।
तयोः समुच्चयायोगादेकस्तु प्रबलः पुरा ।। ३० ।।

[4]अन्योऽनियतकालः स्याद् यावन्मध्येऽपि कर्मणाम् ।
द्वयोरैहिकयोस्तुल्य[5]बलयोः संभवे सति ।। ३१ ।।

क्लैब्याक्लैब्यात्मनोस्तत्र पतिता शक्तिरैश्वरी ।
कर्मान्तरं समुच्चित्य बलादन्यतरस्य तु ।। ३२ ।।

तदा तद्बलवद्भोग्यमन्यत् कालान्तरे भवेत् ।
तथामुष्मिकयोरश्वमेधद्विजवधात्मनोः ।। ३३ ।।

युगपत् संभवे शक्तिद्वयोरपि विनाशिनी ।
अन्यत् [6]कर्मासमं भोग्यं विधत्ते पुरुषस्य सा ।। ३४ ।।

तत्रानियतयोः सद्यः संभवे परिपक्वयोः ।
विरुद्धयोश्च सा शक्तिस्तन्नाशेनान्यभोगदा ।। ३५ ।।

यदान्यत् कर्म सर्वं च समं तस्य विनाशिनी ।
तदा विज्ञानकैवल्यं पुंसः स्यात् कर्मनाशतः[7] ।। ३६ ।।

कर्मनाशान्मलस्यापि विपाके सहकारिणः ।[8]
पतत्यु[9]न्मीलिनी शक्तिस्तदनुग्रहरूपिणी ।। ३७ ।।

तस्यां पतितमात्रायां मलस्याधो नियामिका ।
शक्तिर्निवर्तते तस्यां निवृत्तायां महात्मनः ।। ३८ ।।

वैराग्यं जायते क्षिप्रं संसाराद् दुःखसागरात् ।
दिदृक्षा जायते शंभोः पादपङ्कजयोरपि ।। ३९ ।।

---

[1] स्वराज्यं Pr. [2] पुण्यपापयोः Pr. [3] कृतः कालेन Pr.
[4] अन्योऽन्य° Pr. [5] फलयोः Pr. [6] कर्मसमं Pr.
[7] नाशनः Pr. [8] सहकारिणी Pr. [9] °त्युल्मीलनी° Pr.

कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहं बन्धतः कदा ।
को वा दर्शयिता शंभोरिति संजायते मतिः ।। ४० ।।

एवं संसारतो भीतमनुगृह्णाति चेश्वरः ।
तद्योग्यतानुसारेण करुणागर्भया दृशा ।। ४१ ।।

पुनाति साधिकारेण यं वापि परमेश्वरः ।
[1]तयानुग्रहरूपिण्याः शक्तेर्गतिनिरोधिका ।। ४२ ।।

मलस्य क्षीयते शक्तिः सा दीक्षा शांभवी क्रिया ।
अनुग्राह्यस्य विनये तथानुग्राहकस्य च ।। ४३ ।।

कारुण्ये स शिवः कर्ता तयोर्योगः सुदुर्लभः ।
एतैर्लक्ष्मैरविच्छिन्नैः शक्तिपातो महात्मभिः ।। ४४ ।।

अनुमेयो न दीक्षैषाशक्तिपातापवित्रितैः ।[2]
अन्ये श्रुत्यादिसंसिद्धाः शिवधर्माश्च देशिकैः ।। ४५ ।।

शिष्याणां शक्तिपातार्थं परीक्ष्याः शिवशासने ।
अभक्तमद्विजं क्रूरं निर्भयं वा क्रियाच्युतम् ।। ४६ ।।

दीक्षा मदाज्ञा हन्त्येषा[3] इत्याज्ञा पारमेश्वरी ।
दीक्षैव मोचयेत् पाशान् शिष्यत्वं च ददात्यणोः ।। ४७ ।।

दानं नाम स्वसत्तैव[4] या सा ज्ञानक्रियात्मिका ।
न तु स्थानान्तरादानादप्युत्पत्तिः कदाचन ।। ४८ ।।

इच्छयैवानुगृह्यादौ शिवो विज्ञानकेवलान् ।
मलपाकमपेक्ष्यैव कांश्चिच्छुद्धाध्वगोचरे ।। ४९ ।।

योजयत्यधिकारेषु कृत्वा दृक्क्रिययोत्कटान् ।
[5]कांश्चिद् भोगाह्वये तत्त्वे तत्त्वेऽन्यानीश्वराह्वये ।। ५० ।।

---

[1] यया Pr. [2] पवित्रिते Pr. [3] मदाज्ञाहत्येषा Pr.
[4] स्वसत्तेव Pr. [5] तत्त्वे भोगाह्वये चान्यान् योजयत्यीश्वराह्वये Pr.

अन्यान् विद्याह्वये तत्त्वे सर्वज्ञान् बलशालिनः ।
सदाशिवगुणोपेता भोगाख्यं तत्त्वमाश्रिताः ।। ५१ ।।

मनोऽभिलषितान् भोगान् भुञ्जानान् विविधानपि ।
पतिकृत्याधिकारेषु प्रवृत्ता पत्युरिच्छया ।। ५२ ।।

ये प्राप्ता तत्त्वमैशानं विशेषेण क्रियाधिकाः ।
अधिकारगुणोपेता महान्तश्चक्रवर्तिनः ।। ५३ ।।

अष्टावनन्तसूक्ष्माद्या यथापूर्वं गुणाधिकाः ।
अतिसौन्दर्यलावण्या अक्षीणमनसः सदा ।। ५४ ।।

विद्याविद्याद्वयं प्राप्ताः संख्यया सप्तकोटयः ।
प्रशान्तकलुषाः सर्वे महात्मानोऽमितौजसः ।। ५५ ।।

एतेषां यस्य वैराग्यमुपजातं महात्मनः ।
किमेतेनाधिकारेण श्रेयसः परिपन्थिना ।। ५६ ।।

इति तं परमेशानो मलपाकमपेक्ष्य सः ।
स्वेच्छयैवानुगृह्णाति मुक्तिव्यक्त्यर्थया दृशा ।। ५७ ।।

ततो मुक्त्यर्थमासन्नं कनिष्ठं तत्पदे विभुः ।
नियुनक्त्यनुगृह्यान्यं तत्पदे नियुनक्त्यपि ।। ५८ ।।

ऋषयः—

सत्यात्मनि च संसिद्धे प्राक् प्रोक्तं सफलं भवेत्[1] ।
तत्सद्भावे ततः शंभो प्रमाणमभिधीयताम् ।। ५९ ।।

ईश्वरः—

प्रवर्तमानो देहादिश्चेतनाधिष्ठितः सदा ।
स्वतः प्रवृत्तिशून्यत्वाज्जडत्वेन घटादिवत् ।। ६० ।।

---

[1] जगत् Pr.

यस्तु प्रवर्तकः सोऽयमात्मेति परिपठ्यते ।

ऋषयः——

चैतन्यदर्शनाद् देहे नात्मा [1]चैतन्यसंभवः ।। ६१ ।।

यद्यस्मिन् सति संदृष्टं तदिदं तस्य कारणम् ।
कारणत्वावशिष्टोऽत्र देहश्चैतन्यसाधकः ।। ६२ ।।

शरीरघटयोर्योगात् सुरापूपाख्यकार्ययोः ।
कारणं गुडपिष्टादिरविशिष्टोऽपि दृश्यते ।। ६३ ।।

अपूपादसती पूर्वं मदशक्तिस्तदात्मनि ।
तस्माद् भूतात्मकादेव देहाच्चैतन्यसंभवः ।। ६४ ।।

तच्चैतन्यमधिष्ठातुं किमन्येनात्मनेश्वर ।

ईश्वरः——

केनोक्तं भिन्नकार्याणां वैचित्र्यं नेति शक्तिभिः ।। ६५ ।।

विरुद्धात् कारणात् कार्यं विरुद्धं नोपजायते ।
विरुद्धमपि चैतन्यं जडाद् देहात् कथं भवेत् ।। ६६ ।।

किंच यस्य तु यो धर्मस्तन्नाशाद् धर्मिनाशनम् ।
विरोधिगुणसद्भावादथ स्यादन्यथा द्विजाः ।। ६७ ।।

देहे सत्यपि चैतन्यं मृते किमिति नेष्यते ।
यद्भावयदभावाभ्यां चेष्टाचेष्टे भजेत् तनुः ।। ६८ ।।

तच्चैतन्यमपि प्रोक्तं व्यतिरिक्तं तु देहतः ।
किंच बाल्ये च वार्धक्ये यौवने च विभेदतः ।। ६९ ।।

शरीरस्यानुसंधानं कथं बाल्ये कृतस्य च ।
[2]स तावदनुसंधत्ते प्राग् भुक्ता सेयमङ्गना ।। ७० ।

---

[1] चैतन्यको भवेत् Pr. [2] न Pr.

इति तस्माच्छरीरात्मवादोऽध्यक्षनिराकृतः ।
तस्मात् स्थूलोऽहमित्यादि ज्ञेयो राहोःशिरो यथा[1] ।। ७१ ।।

किंच देहो ममेत्यादि प्रत्ययोऽस्त्येव पुष्कलः ।
बुद्ध्यादीनां न चात्मत्वं सत्कार्यात् [2]सिद्धिरात्मनः ।। ७२ ।।

तदन्यकार्यहेतुत्वात् तेषां सिद्धिर्यतः स्थिता ।
तत्रापि तेषां हेतुत्वे विश्वमप्येकमिष्यताम् ।। ७३ ।।

ऋषयः——

आत्मनो बहवः प्रोक्ताः बहुत्वं केन गम्यते ।
नाध्यक्षगम्यं तत्तावत् नानुमाविषयं ततः ।। ७४ ।।

भेदस्य मेयधर्मत्वात् माता मेयः कथं भवेत् ।
न हेतुसाधनाभावोऽप्यात्मभेदोपपादकः ।। ७५ ।।

सोपाधिकात्मधर्मस्य भेदात् सोपाधिकान्तरे ।
यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।। ७६ ।।

न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ।
तस्मादेकात्मभावेऽस्मिन् परिहारोऽभिधीयताम्[3] ।। ७७ ।।

ईश्वरः——

आत्मनो बहवो जन्ममरणादिविभेदतः ।
जन्मनाशादयो धर्मा दृश्यन्ते भिन्नवस्तुषु ।। ७८ ।।

ततस्तु जन्मनाशाद्या आत्मनो भेदकाः स्थिताः ।
न देहस्यैव जन्माद्या देहाद्यैः सह चात्मनाम् ।। ७९ ।।

देहादेर्यदि [4]जन्माद्या न स्याच्चैतन्यदर्शनम् ।
तद्देहे जातबालानामपि चैतन्यमिष्यते ।। ८० ।।

---

[1] प्रत्ययोऽस्त्येव पुष्कलः Pr. [2] स्थितः Pr. [3] विधीयताम् Pr.
[4] जन्माद्याः Pr.

चैतन्येनापि युक्तः सन् देहादिरुपजायते ।
जन्मादिभेदवन्तोऽतो देहश्चिद्भेदसाधकाः ।। ८१ ।।

चैतन्यस्येह नित्यस्य कथं जन्मेति चेन्मतिः ।
अत्यल्पमिदमेते च नित्या देहेन्द्रियादयः ।। ८२ ।।

नासतो विद्यते भावो नाभावो विद्यते सतः ।
तस्मादेकात्मवादोऽयं कल्पितो मूढचेतनैः ।। ८३ ।।

ऋषयः—

अथाकाशं यथा कुम्भकलशोदञ्चनादिषु ।
एकमेव स्थितं तद्वद् देहेष्वात्मा व्यवस्थितः ।। ८४ ।।

ईश्वरः—

तच्चैकरूपमाकाशं नैव चैतन्यमिष्यते ।
भोक्तुमिच्छा यदैकस्य गन्तुमिच्छापरस्य च ।। ८५ ।।

तदैवमात्मचैतन्यं भिन्नरूपमिव स्थितम् ।
यद्यभिन्नं तु सर्वेषां भोक्तुमिच्छैकदा भवेत् ।। ८६ ।।

ऋषयः—

[1]सोपाधिकात्मधर्मस्य भेदादिति ननूदितम्[2] ।

ईश्वरः—

अणोरभेदे ससिद्धे तथा वक्तव्यमग्रजाः ।। ८७ ।।

युक्तितः साधिते भेदे नासिद्धिः स्वीकृतिः शुभा ।
अत एव घटाकाशे रजोधूमादिभिर्युते ।। ८८ ।।

न सर्वे संप्रयुज्यन्ते यथान्ये तन्न दूषणः ।
भेदस्य मेयधर्मत्वादिति यच्चोदितं पुरा ।। ८९ ।।

---

[1] स्थितः Pr. [2] सोपाधिकस्य धर्मस्य Pr.

स च हेतुरसिद्धोऽत्र मेयामेयार्थयोर्धृतः ।
भेदोऽप्युभयनिष्ठः स्यान्न च मातुरमेयता ।। ९० ।।

शिवस्य मेया ह्यात्मानो न चेत् सर्वज्ञताक्षतिः ।
ज्ञाता चायं न तु ज्ञप्तिमात्रोऽर्थग्राहको यतः ।। ९१ ।।

ऋषयः——

ज्ञप्त्यात्मैवायमुद्दिष्टो ज्ञातृत्वं महतो मतम् ।
महानध्यवसायात्मा तन्त्रेऽप्यस्मिन् महेश्वर ।। ९२ ।।

ईश्वरः——

सर्वे ज्ञातार एवेह दृश्यन्ते प्राणिनः सदा ।
न बौद्धमेतद् ज्ञातृत्वं युक्तं तस्या जडत्वतः ।। ९३ ।।

किंच[1] बुद्ध्यादिभिर्ज्ञानं [2]व्यज्यतेऽत्र सदैव हि ।
किं चानुभूयते ह्यात्मा स्वपरात्मप्रकाशकः ।। ९४ ।।

परप्रकाशकत्वं च नित्यं नित्यगुणो यतः ।
ज्ञातृत्वं नैतदध्यासकृतं भवितुमर्हति ।। ९५ ।।

अन्यत्र दृष्टधर्माणामन्यत्राध्यास इष्यते ।
आत्मेतरस्य [3]ज्ञातृत्वासिद्धेर्नाध्यास इष्यते ।। ९६ ।।

अथ चित्प्रतिबिम्बेन बुद्ध्यादेर्ज्ञातृता भवेत् ।
तर्हि चित्प्रतिबिम्बेन बुद्ध्यादिरपि चिद् भवेत् ।। ९७ ।।

न चेतनो यतो वृद्धौ चिद्रूपः प्रतिबिम्बित[4]ः ।
न चायं प्रतिबिम्बोऽपि चिद्रूपस्यात्मनो मतः ।। ९८ ।।

जडे जडस्य संक्रान्तिर्युज्यते परिणामिनः ।
बुद्ध्यादेः प्रतिबिम्बोऽपि न स्यादात्मन्यसंभवात् ।। ९९ ।।

---

[1] तु Pr. [2] व्यञ्जते Pr. [3] ज्ञातृत्व° Pr. [4] बिम्बितम् Pr.

अन्योन्याध्यासवादोऽयं कुदृष्टिपरिकल्पित[1]: ।
ज्ञातृत्वमपि तन्नित्यं धर्मत्वान्नित्यवस्तुतः ।। १०० ।।

नानित्यधर्मा धर्मी स्यान्नित्य आत्मा मुनीश्वराः ।
तच्चेह विभुधर्मत्वात् न च क्वाचित्कमिष्यते ।। १०१ ।।

नित्यत्वमिव[2] तेनात्मा स्थितः सर्वार्थदृक्क्रियः ।
ज्ञातृत्वमपि यद्यस्य क्वाचित्कं विभुता कुतः ।। १०२ ।।

धर्मिणो यावती व्याप्तिस्तावद् धर्मस्य च स्थितिः ।[3]
यथा पटस्थितं शौक्लचं पटं व्याप्याखिलं स्थितम् ।। १०३ ।।

स्थितं व्याप्यैवमात्मानं ज्ञातृत्वमपि सर्वदा ।
न च निर्विषयं ज्ञानं परापेक्षं स्वरूपतः ।। १०४ ।।

ऋषयः—

व्यापकत्वे ह्यणोः सिद्धे धर्मव्यापकता भवेत् ।
अन्यत्रानुपलब्धस्य देहाद् व्यापकता कुतः ।। १०५ ।।

ईश्वरः—

न देहपरिमाणत्वमणूनामुपपद्यते ।
तस्माद् देहादतोऽन्यत्र स्थितार्थग्राहकत्वतः ।। १०६ ।।

किंचाभिव्यञ्जको यत्र यत्र देहेन्द्रियादिकम् ।[4]
तत्र सर्वत्र तत्कार्यदृष्टेर्व्यापकतात्मनः ।। १०७ ।।

व्यापकोऽयममूर्तत्वाद्यथा व्योम ततस्तथा ।
तद्धर्मभूतं ज्ञानं च व्यापकं विषयोन्मुखम् ।। १०८ ।।

यन्नित्यरूपं विज्ञानं तच्च निर्विषयात्मकम् ।
पक्षोऽध्यक्षनिरस्तोऽयं स्वपरग्राहकत्वतः ।। १०९ ।।

---

[1] कल्पितम् Pr. [2] °मपि Pr. [3] व्यवस्थितिः Pr.
[4] देहेन्द्रियादिकः Pr.

अणोः प्रत्यक्षसिद्धत्वात् नानुमाध्यक्षबाधिका ।
नेह ग्राहकताबुद्धेः साधितत्वाज्जडत्वतः ।। ११० ।।

किंचैतद् ग्राहकत्वं च न भेदादात्मनां स्थितम् ।
स्वरूपं तु ततस्तेषां ग्राहकत्वेन संस्थितिः[1] ।। १११ ।।

[2]न ह्यंशेन पदार्थानां विचारः शोभते क्वचित् ।
अग्निः शक्तिं विना कीदृगिति चिन्ता न कुत्रचित् ।। ११२ ।।

स्वपरग्राहकस्तस्मात् सर्वदात्मा व्यवस्थितः ।
तद्वत् स्वतोऽमी सर्वज्ञाः किंचिज् ज्ञानं तु कारणात् ।। ११३ ।।

विरुद्धं तेन [3]सार्वज्ञ्यं स मलः परिपठ्यते ।
तच्च द्रव्यं यतः कर्म निवृत्त्यं[4] पटलादिवत् ।। ११४ ।।

किंच द्रव्यं मलोऽनेकशक्तिमत्वाद्यथानलः ।
[5]तदिह ज्ञानमात्रं चेत् ज्ञानाभावः क्रिमज्ञता ।। ११५ ।।

अन्यथा वृत्तिभासो वा गतिरन्या न विद्यते ।
ज्ञानाभावो न चाज्ञानं तस्याकिंचित्करत्वतः ।। ११६ ।।

[6]न ह्यभावो घटस्येह जलमाहरति क्वचित् ।
ज्ञानस्य प्रागभावश्चेद् ज्ञानोत्पत्तिः प्रसज्यते[7] ।। ११७ ।।

[8]नाप्येतदन्यथा ज्ञानं तस्याप्यनुदयात् स्वतः ।
शुक्तिकारजतज्ञानं न भवेत् पटलं विना ।। ११८ ।।

किंचैतदन्यथा ज्ञानमागन्तुकमथेतरत् ।
आगन्तुकं चेच्चिच्छक्तेर्बाधके[9] न कदाचन ।। ११९ ।।

यद्यनागन्तुकं तर्हि नान्यथा ज्ञानमेव तत् ।
अनित्यमेव तज्ज्ञेयं[10] रजतज्ञानवद् द्विजाः ।। १२० ।।

---

[1] संस्थितेः Pr. [2] न चांशेन Pr. [3] सर्वज्ञं Pr. [4] निवृत्यं Pr.
[5] तदिहा ज्ञान° Pr. [6] नाभावोऽपि Pr. [7] प्रशस्यते Pr.
[8] नचेदप्यन्यथा Pr. [9] बाधिका Pr. [10] ज्ञानं Pr.

किंचैतदन्यथा ज्ञानं न सम्यग् ज्ञानबाधकम् ।
न दृष्टं शुक्तिकाज्ञानं रजतज्ञानबाधकम्[1] ।। १२१ ।।

अथ चेन्नित्यसिद्धस्तु[2] तयोः संबन्ध उच्यते ।
तथापि बाधकं चैतद् ज्ञानस्येहान्यथात्मकम् ।। १२२ ।।

प्रत्युत ज्ञानसाध्यं स्यान्नित्यमप्यन्यथात्मकम् ।
चिरकालस्थितो दीपश्चिरकालतमोऽपहः ।। १२३ ।।

तस्माद्येनात्मनो ज्ञानं बलिना वस्तुना सदा ।
विरुद्धेनैव बाध्यं स्यात् तन्मलाख्यमितीष्यताम् ।। १२४ ।।

आत्मा मलावृतः सर्वज्ञत्वे किंचिज्ज्ञता यतः ।
न किंचिज्ज्ञस्तु यः सोऽयं मलेनापि न संवृतः ।। १२५ ।।

यथा शिवस्तथा चायं मलेनैव समावृतः ।
किं चायं मलिनो नो चेत् सक्तिर्भोगे कथं भवेत् ।। १२६ ।।

यदि सा निर्मलेऽपि स्यान्मुक्तात्मस्वपि सा भवेत् ।
रागोऽस्ति कारणं सक्तेरिति चेत् किं मलेन तु ।। १२७ ।।

सत्यं रागोऽस्ति तद्धेतुर्न च किंचित्करोऽमले ।
अमलेऽपि स चेत् सक्त्यै स्यान्मुक्तेऽप्यविशेषतः ।। १२८ ।।

स हि मुक्तः शिवो वापि भोगासक्तः कदाचन ।
किंचायं प्रत्ययात्मोक्तो रागो बौद्धो यतस्ततः ।। १२९ ।।

बुद्धिश्च प्रकृतेः सिद्धा[3] तस्मादेष विनश्वरः ।
चिच्छक्तेर्नित्यसिद्धाया [4]बाधकः कथमिष्यते ।। १३० ।।

कर्मणापि न च ज्ञानबाधः संभवति द्विजाः ।
साध्यत्वात् कर्मणः [5]पुंसो बाधकत्वेन संस्थितेः ।। १३१ ।।

---

[1] बाधितम् Pr. [2] सिद्धिस्तु Pr. [3] सिद्धः Pr.
[4] संभवेत् बाधकः कथम् Pr. [5] पुंसां Pr.

किं च भोगैकहेतुस्तत् कथं भोग्यस्य बाधकम् ।[1]
यतो ज्ञानात्मको भोगो न हि तेन तदावृतिः ।। १३२ ।।

धर्माधर्मात्मकं कर्म तौ च बौद्धौ[2] व्यवस्थितौ ।
[3]व्याप्त्यभावात् तयोरूर्ध्वं बाधकौ सर्वतः कथम् ।। १३३ ।।

किंच भोगप्रवृत्तौ[4] तौ व्याप्रियेत कथं वृतौ ।
अन्यत्रापि प्रवृत्तस्य यद्यप्यत्रापि हेतुता ।। १३४ ।।

अनेकतत्त्वसंक्लृप्तिः कार्यभेदाद् विहन्यते ।
कस्मान्न कर्म चिच्छक्तेर्बाधकं संव्यवस्थितम् ।। १३५ ।।

किंचाभिव्यञ्जकं कर्म चिच्छक्तेर्बाधकं कथम् ।
मायापि बाधका न स्यादित्युक्तं तन्निरूपणे ।। १३६ ।।

मल एव समुद्दिष्टः पुंसां सर्वज्ञबाधकः ।
मलोऽपि सप्तधा ज्ञेयो मोहश्चापि मदस्तथा ।। १३७ ।।

रागोऽन्यश्च विषादाख्यस्तापः शोषश्च सप्तमः ।
वैचित्र्यमपि सर्वेषां मलिनानां प्रकीर्तितम् ।। १३८ ।।

मोहो नाम मलः पुंसां सहजोऽनादिमानिह ।
योनिः षण्णां मदादीनां प्रधानत्वाद् द्विजोत्तमाः ।। १३९ ।।

यस्मिन् सत्यात्मनो मोहो[5] ज्ञानतोऽप्यङ्गनादिषु ।
स मोह इति विख्यातो वर्ज्यावर्ज्याविभागतः ।। १४० ।।

प्राप्तामपि स्त्रियं येन स्तौति नास्याः पराङ्गना ।
दिव्याङ्गनेयमेवेति स मदः परिपठ्यते ।। १४१ ।।

[6]तदलाभे विषण्णत्वं बाष्पलोचनता यतः ।
स विषादो मलो नाम प्राणिनामतिदुःखदः ।। १४२ ।।

---

[1] बाधकः Pr. [2] बुद्धौ Pr. [3] व्याप्त्याभावात् Pr.
[4] प्रसक्तौ S.P. [5] मोहे Pr. [6] तदभावे Pr.

ततस्तापो भवेदन्तःप्रलापात्मातिविस्तरः ।
स ताप इति विख्यातो मलः शोषो भवेत् ततः ।। १४३ ।।

स्तब्धात्मा तु यदा यस्मान्मलोऽतीव सुदुस्तरः ।
एष बन्धुरियं भार्या राष्ट्रं चेदं धनं मही ।। १४४ ।।

[1]कृतार्थोऽहमतो यद्वा कस्त्राता मामकस्य च ।
कुटुम्बस्यैवमाद्या तु चिन्ता येन नृणां भवेत् ।। १४५ ।।

नानामतिकरः सोऽयं मलो वैचित्र्यसंज्ञितः ।
सप्तैते सहजाः प्रोक्ता मला मलवतां नृणाम् ।। १४६ ।।

मले सति कलादीनां यथा संबन्ध इष्यते ।
एवमेष्वपि सत्स्वेव बन्धयन्ति कलादयः ।। १४७ ।।

एते मलवतां पुंसां धर्माः सप्त सहोदिताः ।

ऋषयः—

जडेनाजडरूपस्य तिरस्कारो न युज्यते ।। १४८ ।।

आवृत्तिश्च न युक्तास्य व्यापकत्वेन हेतुना ।
अनादिकालसंरूढान् मलाख्याद् वासितादणोः ।। १४९ ।।

अजडापि तिरोभूता शक्तिर्नित्या [2]जडात्मनः ।।
किंचाजडं जडेनैव बाध्यते नाजडेन तु ।। १५० ।।

स्वजातीयत्वतो हेतोरणूनामीश्वरो यथा ।
यथाभिभूतगन्धस्य निम्बत्वक् चन्दनस्य तु ।। १५१ ।।

किंचाजडं जडान्नो चेत् बाध्यं तत् केन बाध्यते ।
अजडं च जडं वापि द्वयं वस्तु विनिश्चितम् ।। १५२ ।।

आत्मा नात्मान्तराद् बाध्यो विनाशाद् बाधकात्मनः ।
तन्नाशमन्तरा यस्मान्मुक्तिर्यस्माच्चिदात्मनः ।। १५३ ।।

---

[1] कृतोऽर्थ° Pr. [2] जडात्म Pr.

जडेनैवाजडं तस्माद् बाध्यमभ्युपगम्यताम् ।

ऋषयः——

अनादिरपि संबन्धः प्रोक्तो यदि मलात्मनोः ।। १५४ ।।

मलात् किं क्रियते तत्र शक्तेरावरणं तु वा ।
अप्रकाशी कृतिर्वापि तत्राद्यस्तु न शोभते ।। १५५ ।।

तस्याश्चाभिन्नरूपत्वादात्मनोऽपि प्रसङ्गतः ।
नाप्यप्रकाशीकरणं विनाशित्वप्रसङ्गतः ।। १५६ ।।

प्रकाशस्याप्रकाशोऽपि विनाशान्नावशिष्यते ।
तत्सर्वं कथयेशान संदेहोऽस्माकमीश्वर ।। १५७ ।।

ईश्वरः——

न चावृतिर्मले[1]नेष्टा चिच्छक्तेर्व्यापकत्वतः ।
नाप्यप्रकाशीकरणं किंतु कार्यप्रवर्तनम् ।। १५८ ।।

क्रियतेऽग्निगता शक्तिर्मन्त्रशक्तिस्तिरोहिता ।
नैव स्फोटकरी सद्यः प्रज्वलत्यपि पावके ।। १५९ ।।

अतिरोहितभावोऽपि मलेनैव स्वशक्तिभिः ।
तिरोहितोऽपि कार्येषु न चाणुः संप्रवर्तते ।। १६०।।

ऋषयः——

दृक्क्रियारूपिणी शक्तिः कथिता परमेश्वर ।
ते च विज्ञेयकर्तव्यविरहे न कदाचन ।। १६१ ।।

न हि यस्मात् परं कार्यं ज्ञत्वकर्तृत्वरूपतः ।

ऋषयः——

शक्तिकार्ये तिरोधानं मलेन कथितं कथम् ।। १६२ ।।

---

[1] नेष्यच्चिच्छक्ति° Pr.

शक्तिनर्थान्तरं यस्मात् कार्यं तद् वद शंकर ।

ईश्वरः—

न शक्तिरेव कर्तव्यशक्तिर्दृक्क्रिययोर्यतः ।। १६३ ।।

अविभागस्य भागोक्तौ सद्विभाग उपाधितः ।
प्रत्यर्थमपि संबन्धस्तत्कार्यमितरं तु तत् ।। १६४ ।।

परार्थमात्रसंशक्तिरूपं तच्छक्तिसंज्ञितम् ।
सहजं तस्य तज्ज्ञेयं तन्मलेन निरुद्ध्यते ।। १६५ ।।

तस्मिन्निरुद्धे तत्कार्यं प्रत्यर्थं वेदनात्मकम् ।
न जायते ततः कार्यतिरोधानं मलात् स्थितम् ।। १६६ ।।

ऋषयः—

विषयाभिमुखी प्रोक्ता शक्तिर्मलनिरोधतः ।
विषयाभिमुखी नो चेत् स्थितिमस्या वदेश्वर ।। १६७ ।।

ईश्वरः—

यथा चक्षुस्तमोबन्धात् सत्त्वरूपमपि स्फुटम् ।
विषयाभिमुखं चापि स्वनिष्ठं व्यवतिष्ठते ।। १६८ ।।

एवं चिच्छक्तिरूप्येषा मलशक्त्या विदूषिका ।
स्वनिष्ठा विषयज्ञानकार्या कर्त्री व्यवस्थिता ।। १६९ ।।

मल एवं समुद्दिष्टः पुंसां सर्वज्ञबाधकः ।
अनेनैवावियुक्तत्वात् पशुत्वेन सहास्य च ।।
गणना चोदिता चैव पशुरेवं विबोधितः ।। १७० ।।

इति श्रीपौष्करागमे ज्ञानपादे
पशुपदार्थनिरूपणं नाम चतुर्थः पटलः

— ० —

पञ्चमः पटलः

— ० —

ईश्वरः—

अथ पाशाः पुरोद्दिष्टाः श्रूयतां मुनिपुंगवाः ।
कला विद्या च[1] रागश्च कालो नियतिरेव च ।। १ ।।

पञ्चैतानि च तत्त्वानि मायेयानि द्विजोत्तमाः ।
मलान् सर्वान् [2]मनाग् भित्वा चैतन्यप्रसरात्मनः ।। २ ।।

चैतन्यव्यञ्जिका ह्यत्र कलामलनिवर्तनात् ।
चैतन्यं ज्ञत्वकर्तृत्वरूपं तद्बलमात्मनः ।। ३ ।।

कलया व्यज्यते तत्तु तस्यैव हि तिरस्कृतम् ।
सर्वात्मना कला नैतच्चैतन्यं व्यञ्जयत्यणोः ।। ४ ।।

किंतु कर्मानुसारेण कलावृत्त्यैकदेशतः ।
ततश्चायं कलाबन्धः पुंसां प्राथमिकः स्थितः ।। ५ ।।

यतः कलां विना तेषां रूपं तन्न तु[3] सिद्ध्यति ।
ततस्तच्छून्यकल्पं स्याच्चैतन्यप्रसरं विना ।। ६ ।।

ग्राहकत्वेन तत्सिद्धेर्न च तद्ग्रहणं विना ।
ग्रहणा[4]भावतस्तस्य ग्राहकः शून्यवत् स्थितः ।। ७ ।।

तन्निवृत्त्यर्थमादौ तु मायातो जायते कला ।
ततो विद्या कला तत्त्वादभूद् भोगार्थमात्मनः ।। ८ ।।

कलया कर्तृभूतस्य बुद्धिलक्षणकर्मणः ।[5]
आलोकने यत् करणं सा विद्या शिवशासने ।। ९ ।।

---

[1] विद्याश्च Pr. [2] सर्वात्मना Pr. [3] °त्वसिद्ध्यति Pr.
[4] °भावतस्यास्य Pr. [5] धर्मणः Pr.

बुद्धिर्हि कर्मग्राह्यत्वादात्मनो घटकुड्यवत् ।
ग्राह्यं करणसापेक्षं दृष्टं रूपादिकं यथा ।। १० ।।

[1]ततस्तु चक्षुराद्यैश्च क्रमेणार्थे विनिश्चिते ।
बुद्ध्यन्तैर्निश्चितार्थैस्तां पुमान् संवेत्ति विद्यया ।। ११ ।।

चिच्छक्तिः करणं बुद्ध्यालोचनेनेह केवला ।
विद्यासंमिश्रिता[2] किंतु विद्यैव करणं ततः ।। १२ ।।

बुद्धि चिच्छक्तिरेवेह यदि पश्येत केवला ।
[3]तदा संवेदनं भोगरूपं न स्यात् कदाचन ।। १३ ।।

तस्या विवेकरूपत्वादविवेकः कथं तया ।
तस्माद् भोगस्य संवित्तौ विद्याकरणमात्मनः ।। १४ ।।

किंचाक्षवस्तुसंयोगाद्यो बोधो निर्विकल्पकः ।
स च विद्यात्मको ज्ञेयो बुद्धेस्तत्राप्रवृत्तितः [4]।। १५ ।।

तस्यास्तत्रापि हेतुत्वे सोऽपि स्यान्निश्चयात्मकः ।
तद्विनिश्चयरूपोऽयं बोधस्त्वालोचनात्मकः ।। १६ ।।

अभिमाने तु संकल्पे निश्चये वेदनं तु तत् ।
अहंकारमनोबुद्धिकार्ये तदपि विद्यया ।। १७ ।।

बुद्ध्यादयो जडत्वेन न बोधस्य तु हेतवः ।
विद्याकलुषिता तस्माच्छिच्छक्तिर्बोधिकात्मनः ।। १८ ।।

किंच बुद्ध्यादयोऽन्येभ्यो रविवत् संप्रकाशकाः ।
बोधात्मकप्रकाशे तु न तेषामपि हेतुता ।। १९ ।।

भोगस्वीकरणे विद्या संविदः करणं ततः ।
कलावृत्तिं[5] विना तस्य नानयोः कार्यसंकरः ।। २० ।।

---

[1] ततस्तच्चक्षुराद्यैश्च Pr. [2] किच Pr. [3] तदाहं वेदनं बोधरूपं Pr.
[4] °त्राप्रवर्तितः Pr. [5] विनैतस्या Pr.

कलातोऽनन्तरं विद्या द्वितीयो बन्ध आत्मनः ।[1]
कलाविद्याह्वयौ बन्धौ कर्तुरेवोपकारकौ ।। २१ ।।

प्रवृत्तस्य प्रसक्त्यर्थमपि रागः प्रवर्तते ।
भोगाभावादसक्तस्य भुञ्जानस्य मलीमसान् ।। २२ ।।

भोगानतृप्तेस्तस्यातः कर्तुरेवोपकारिता ।[2]
[3]कालः प्रवृत्तमेवाणुं कलयत्यात्मवृत्तिभिः ।। २३ ।।

नियतिश्च तथा कर्मफले नियमयत्यणुम् ।
तस्मान्नियतिकालौ च स्थितौ कर्तुपकारकौ ।। २४ ।।

असामञ्जस्य रोधेन कर्मणोऽप्युपकारिका ।[4]
[5]कालोऽपि नियतिस्तद्वत् कलाभोग्ये[6] यदात्मनः ।। २५ ।।

[7]यथाणोः कलितस्यैव विद्यया कलयापि च ।
कलातो जायते रागः सद्यः पुंसां प्रवृत्तये ।। २६ ।।

अनिच्छन् नहि भुञ्जानो दृश्यते क्वचिदप्यणुः ।
रागाद् भोग्येषु सक्तत्वात् भोग्यं भोक्तुमतोऽर्हति ।। २७ ।।

ऋषयः—

स तु बुद्धिगतो रागः किमन्यदपि चेष्यते ।
अलमेकेन चेद् द्वाभ्यां किमत्र कथयेश्वर ।। २८ ।।

ईश्वरः—

योऽयं बुद्धिगतो रागः संप्रोक्तः प्रत्ययात्मकः ।
स स्यादनेन रक्तस्य नारक्तस्य कदाचन ।। २९ ।।

तस्मादनेन रागेण विद्यया कलुषीकृता[8] ।
चिच्छक्तिरिच्छारूपैव सती बुद्धिगतेन तु ।। ३० ।।

---

[1] आत्मनाम् Pr. [2] °पकारता Pr. [3] कालप्रवृत्त° Pr. [4] °पकारकौ Pr.
[5] नियतिस्तद्वत्कालोऽपि Pr. [6] भोज्ये Pr. [7] अथाणोः Pr. [8] कृता ।
इत्यनन्तरं 'मायापि शक्तौ तस्मादित्युक्तं तन्निरूपणे' इति मुद्रितकोशे दृश्यते ।

रागेण सह संपृक्ता विषयं विषयं प्रति ।
भिन्ना [1]विशिष्टरूपा स्यादन्या सामान्यरूपिणी ।। ३१ ।।

तत्र ग्राहकनिष्ठोऽयं रागो बौद्धात् पृथङ्मतः ।
भावानां त्रिगुणात्मत्वादिष्यते सुखरूपता ।। ३२ ।।

तस्मादेव प्रवृत्तिः स्यात् किमेतेनेति चेन्मतिः ।
तन्नैषां चाविशेषेण भावानां सर्वजन्तुषु ।। ३३ ।।

रञ्जका स्युरतो वीतरागाभावः प्रसज्यते ।

ऋषयः—

रागो ग्राहकनिष्ठश्चेत् कलादिरिव सर्वदा ।। ३४ ।।

भुक्तभोगस्य च तदा रागस्तद्विषयोऽसकृत् ।
विरज्यते कथं पश्चाद् भुक्तभोगस्तु मानवः ।। ३५ ।।

ईश्वरः—

रागोऽपि द्विविधो वासनात्मा च प्रत्ययात्मकः ।
तत्र संवेदनात्मा यो रागो विषयसंस्थितः ।। ३६ ।।

[2]तत्त्यागे विषयत्यागाद् विरक्तः पुरुषो भवेत् ।
न मायेयस्य रागस्याप्यभावो वासनात्मनः ।। ३७ ।।

बौद्धे नासति रागेऽस्मिन् वासनात्मा प्रवर्तकः ।[3]
[4]ग्राह्याभावे यथा नेत्रं सदकिंचित्करं भवेत्[5] ।। ३८ ।।

एवं बौद्धेऽपि रागेऽस्मिन् स्यादसत्यप्रवर्तकः[6] ।
विद्यमानेऽपि विषयो न ग्राह्योऽसति चक्षुषि ।। ३९ ।।

---

1 विचित्ररूपा Pr. 2 विषयत्यागाच्च तत्त्यागे Pr. 3 प्रवृत्तिकः Pr.
4 ग्राह्यस्याभावो Pr. 5 स्याद किंचित्करो भवेत् Pr.
6 °दसत्यां प्रवर्तकः Pr.

रागोऽतो वासनात्मायं संस्थितो ग्राहकात्मनः ।
यदि तस्याप्यभावेन वैराग्यं विषयेष्वणोः ।। ४० ।।

अन्यत्र विषये पश्चाद् रक्तो न स्यात् कदाचन ।
रज्यते चायमन्यत्र वासनात्मा ततः स्थिरः ।। ४१ ।।

ऋषयः——

यद्येवं वासनात्मा तु स्थिरो रागो महेश्वर ।
वीतरागः कथं सद्यः पुमान् संपद्यते वद ।। ४२ ।।

ईश्वरः——

ईश्वरप्रणिधानेन दीक्षया क्षपितेन वा ।
रागो निवर्तते[1]पुंसः सर्वथा नैकदेशतः ।। ४३ ।।

वीतरागस्य नाभावस्तस्मादेव[2] मुनीश्वराः ।
न हि वृत्त्यविनाभावसंबन्धाच्छुद्धगोचरः ।। ४४ ।।

रागः श्रेयस्यणून् सद्यः संयोजयति नाद्भुतम् ।
शिवरागोऽयमाख्यातो मलस्यापि क्षयावहः ।। ४५ ।।

एवं रागः समासेन वर्णितः काल उच्यते ।
अथ कालः क्रमात् प्राप्तः संक्षेपेणाधुनोच्यते ।। ४६ ।।

कलादिभिस्त्रिभिस्तत्त्वैः प्रवृत्तं पुरुषं ततः ।
लवत्रुटयादिभिः कालः कलयत्यात्मवृत्तिभिः ।। ४७ ।।

ताश्च भौवनदेहोर्ध्वमेवं[3] यस्मात् क्रियास्तदा[4] ।
[5]अतीतवर्तमानैष्यद्वृत्तीनां कारणं तु यत् ।। ४८ ।।

स काल इति मन्तव्यो भोग्यार्थोत्पादको नृणाम् ।
[6]नाकाले जायते कश्चिन्नाकाले म्रियतेऽपि च ।। ४९ ।।

---

[1] पुंसां Pr. [2] °देनं Pr. [3] °देहोध्वा Pr. [4] तथा Pr.
[5] नेष्यत् Pr. [6] नाकालो Pr.

चक्रादिवद् घटोत्पत्तौ तस्मात् काल[1]: प्रवर्तकः ।
घटः संजायमानोऽयं जातो नेतः पुरा क्वचित् ।। ५० ।।

सति मृत्पिण्डचक्रादौ कुम्भकर्तरि सत्यपि ।
यत्तत्र कारणं कालः पदार्थानां प्रवर्तकः[2] ।। ५१ ।।

काले तु सति जायेरन् सर्वे भावाश्च सर्वथा[3] ।
न कर्म कारणं तत्र तद्धि काले प्रवर्तकम् ।। ५२ ।।

ऋषयः——

काल एको विभुर्नित्य इष्यते कैश्चिदीश्वर ।
तथा किमिति नेष्टोऽत्र भगवन् वक्तुमर्हसि ।। ५३ ।।

ईश्वरः——

काल एको यदीष्येत[4] क्रियातो नातिरिच्यते ।
यस्मात् स्वतः क्रियायास्तु नास्त्यतीतादिरूपता ।। ५४ ।।[5]

तस्या एव यदीष्येत सैवः कालः प्रसज्यते ।
ततश्च वर्तमानादिपदार्थानां मुनीश्वराः ।। ५५ ।।

वर्तमानादिरूपैस्तु कालैर्भिन्नैर्व्यवस्थितिः ।[6]
[7]ततश्च नैकः कालोऽयं कित्वनन्तात्मवृत्तिकः ।। ५६ ।।

ऋषयः——

एष्योऽतीतश्च कालौ यौ प्रतीयेत महेश्वर ।
वर्तमानक्षणो मध्ये नेष्यते तदसंभवात् ।। ५७ ।।

अतीतकाले मृत्पिण्डरूपः कुम्भो व्यवस्थितः ।
[8]शकलात्मेष्यति तदा कुम्भो नार्थक्रियादिभिः ।। ५८ ।।

---

[1] कालप्त° Pr. [2] पदार्थः संप्रवर्तकः Pr. [3] सर्वदा Pr.
[4] यदीष्येते Pr. [5] नास्त्वतीतादि Pr. [6] स्थितः Pr. [7] नैक काल° Pr.
[8] ष्यति तथा Pr.

आनीयते [1]तयोर्मध्ये वर्तमानः स इष्यताम् ।
द्वाभ्यां स किल भागाभ्यां भावानां वरणात्मकः ।। ५९ ।।

वर्तमानस्तृतीयोऽन्यो भागो भावप्रकाशकः ।
जडत्वे सत्यनेकत्वान्न नित्योऽयं यथा घटः ।। ६० ।।

अनित्यस्य [2]स्वतस्तस्य विभुत्वं विनिवारितम् ।
अथ कालोऽयमुत्पाद्यमानः कालेन चेति चेत् ।। ६१ ।।

न कालापेक्षयोत्पत्तिः कालस्यापि व्यवस्थिता ।[3]
किंतूत्पत्तिः पदार्थानां कल्प्यते कालयोगतः ।। ६२ ।।

शिवः कालानवच्छिन्नो मायातः स्वीयशक्तितः ।
उत्पादयति विश्वं संकल्पादुत्पादकक्रमात् ।। ६३ ।।

ऋषयः—

अनित्यः काल उद्दिष्टस्तत् कथं नित्यमात्मनाम् ।
नित्यकालानुवर्तित्वं नित्यत्वं तद् वदेश्वर ।। ६४ ।।

ईश्वरः—

कालावच्छेद[4]शून्यत्वान्नित्यत्वं कालवत् स्थितम् ।
न हि कालस्य नित्यत्वं कालवस्त्वनवस्थितेः ।। ६५ ।।

मायातत्त्वादधोभागे कालोऽयं प्रतिपादितः ।
शुद्धाध्वसृष्टिसंहारस्थित्यादिनियमः कथम् ।। ६६ ।।

शुद्धाध्वनि [5]विशुद्धस्तु कालोऽस्तीति पुरोदितः ।
तेन कालेन तत्रस्थाः कल्प्यन्ते शिवशक्तितः ।। ६७ ।।

---

[1] यतो मध्ये Pr. [2] सतस्तस्य Pr. [3] स्थितः Pr.
[4] शून्यं नित्यत्वं Pr. [5] विशुद्धश्च Pr.

ऋषयः—

मायोत्थत्वेन कालस्य विनाशित्वं व्यवस्थितम् ।
कथं महार्थसंहारनियमः कालतो भवेत् ।। ६८ ।।

ईश्वरः—

तदसत्प्रलयस्यास्य नियमो न[1] तु कालतः ।
किंतु भोगेषु खिन्नानां विश्रान्त्यर्थं महेश्वरः ।। ६९ ।।

[2]स्वेच्छयैवोपसंहारे नियमं विदधाति सः ।[3]
ततः क्रियोपसंहारे कालापेक्षा न संमता ।। ७० ।।

प्रलयेऽप्यनुगृह्णाति सृजत्यवति हन्ति च ।
तिरोदधाति भगवान् न कालापेक्षया सदा ।। ७१ ।।

ऋषयः—

वर्तमानादयः कालाः ये पूर्वं प्रतिपादिताः ।
न युक्तियुक्तास्ते यस्माद् वर्तमाने घटे सति ।। ७२ ।।

घटस्यातीततापि स्यादस्यैव प्रागभावता ।
तस्मादेकक्षणस्यास्य कथमत्र निरूप्यताम् ।। ७३ ।।

ईश्वरः—

वर्तमानक्षणे [4]सर्वभावोत्पत्तिर्न नाशनम् ।
नाशोऽपि सर्ववस्तूनामतीते काल एव च[5] ।। ७४ ।।

इत्येवं नियमे न स्यादेतदेवोभयं यतः ।
वर्तते नाश एकस्य तदैवान्यस्य चोदयः ।। ७५ ।।

अन्यस्तु शक्तिरूपेण वर्तते चैष्यदात्मकः ।
तस्मादेकक्षणे वर्तमानादिः सर्ववस्तुषु ।। ७६ ।।

---

[1] नहि Pr. [2] मायोर्ध्वत्वेन Pr. [3] °ति ततस्ततः Pr.
[4] सर्वं भावोत्पत्तिननाशनम् Pr. [5] सः Pr.

क्रियाभिरेव [1]विद्यन्ते पदार्थाः स्वानुसारतः ।
तस्मात् प्रतिपदार्थं च वर्तमानादयो न हि ।। ७७ ।।

प्रयोगश्च तथा लोके घटः संप्रति वर्तते ।
विनश्यति तिले तैलमस्तीति मुनिसत्तमाः[2] ।। ७८ ।।

एवं कालः समासेन युष्माकं प्रतिपादितः ।
समासेनाथ नियतिं शृणुध्वं मुनिपुंगवाः ।। ७९ ।।

भोगायाभिप्रवृत्तस्य कलाविद्यादिवृत्तिभिः ।
कर्मणामार्जितानां तु [3]फलापहरणे सति ।। ८० ।।

तद्विनाशे [4]प्रवृत्तेयं नियतिः शिवशासने ।
[5]न तद्वन्नियमेनापि मलमायाख्यकर्मणाम् ।। ८१ ।।

प्रवृत्ता किंतु तद्युक्तपुरुषस्यैव हे द्विजाः ।
अपि भोगेष्वनिच्छन्तं[6] नियोजयति सा बलात् ।। ८२ ।।

स्वार्जितेष्वेव नेहान्यैरार्जितेषु कदाचन ।
यदि सा न भवेदन्ये [7]भुञ्जीरन्नार्जितं परैः ।। ८३ ।।

राजाज्ञामन्तरा यद्वद् भुञ्जते दस्यवः परैः ।
आर्जितानि तथैवेदमसामञ्जस्य नाशिका ।। ८४ ।।

अनया नियतं तच्च यच्छरीरेन्द्रियादिकम् ।
अथ चेच्छांकरी शक्तिर्या सैव स्यान्नियामिका ।। ८५ ।।

सत्यं न सा स्वतः किंतु नियतिव्यवधानतः ।
[8]तत्संबन्धाद् विमुच्येरन् सैव चेन्नियतिर्यदि ।। ८६ ।।

न कर्म स्वफलं पुंसां संबन्धयितुमर्हति ।
कर्मत्वात् कृषिवत् तस्मान्नेह कर्म नियामकम् ।। ८७ ।।

---

1 भिद्यन्ते Pr. 2 मुनिपुंगवाः S.P. 3 फलोपहरणे Pr.
4 प्रवृत्तोऽयं Pr. 5 न हि तद्वत्° Pr. 6 °ष्वनिश्चिन्ता Pr.
7 भुज्यन्ते Pr. भुञ्जाते S.P. 8 तत्संबन्धाच्च मुच्येन् Pr.

ऋषयः—

अन्यैरपि कृतं कर्म कृष्याद्यं तत्फलं तु यत् ।
[1]तत्कर्म कर्त्रा न व्याप्तं दृश्यते क्वचिदीश्वर ।। ८८ ।।

सति यद्यपि राजाज्ञा दृष्टान्तो विषमस्ततः ।

ईश्वरः—

ते च प्रयोज्यकर्तारो भुञ्जते कृषिजं फलम् ।। ८९ ।।

कृषिकर्तार आज्ञात एव कर्म प्रकुर्वते ।
यथाध्वर्युकृतो यागो यजमानफलावहः ।। ९० ।।

तस्मात् तेऽप्यत्र कर्तारस्ततो न प्रोक्तदूषणम् ।
पक्षपातविनिर्मुक्ता राजाज्ञा यत्र विद्यते ।। ९१ ।।[2]

तत्रावश्यं तु तत्कर्त्रा व्याप्तं तत् कृषिजं फलम् ।
किंचादृष्टात्मकं कर्म विद्यते बलवत्तरम् ।। ९२ ।।

फलं तदनुसारेण भुञ्जते ते मुनीश्वराः ।
[3]तस्मान्नियतितत्त्वं तु पुंसां भोग्यनियामकम् ।। ९३ ।।

इति श्रीमत्पौष्करागमे ज्ञानपादे
पाशनिरूपणं नाम पञ्चमः पटलः

—— ० ——

षष्ठः पटलः

—— ० ——

ईश्वरः—

शृणुध्वमथ पुंस्तत्त्वं यथावन्मुनिपुंगवाः ।
पञ्चकञ्चुकसंयुक्तः प्रकृतिं भोक्तुमुद्यतः ।। १ ।।[4]

---

[1] °कर्मकर्तृव्याप्तं Pr. [2] वर्तते Pr. [3] °नियतयः सन्तु Pr.
[4] भोक्तुरुद्यतः Pr.

अविद्यादिसमायुक्तः पुरुषः परिकीर्तितः ।
न विज्ञाना[1]कलस्तेन नापि प्रलयकेवलः ।। २ ।।

[2]पुरुषाख्यां लभेद् यस्मान्नाविद्यादिविवर्जितः ।
तस्मात् सकल एवाणुर्लभते पुरुषाह्वयम् ।। ३ ।।

कलादिपञ्चकस्यैव यदि पुंस्त्वे निमित्तता ।[3]
तदा प्रकृतिभोक्तृत्वं न स्याज्ज्ञानाकले[4] यथा ।। ४ ।।

तदा विद्यादिमात्रस्य नापि पुंस्त्वे निमित्तता ।[5]
कलाद्यभावे कर्तृत्वाभावाद् भोक्ता कथं भवेत् ।। ५ ।।

प्रकृतेर्यस्त्वविद्यादिः[6] पुंसां पुंस्त्वमलः स्मृतः ।
तदाक्रान्तः कलाद्याढ्यः पुंरुषस्तेन संमतः ।। ६ ।।

ऋषयः—

दीक्षया [7]तु पुरा पुंसि भुवनान्युदितानि हि[8] ।
कथमत्र स्थितिस्तेषां छिन्धि संदेहजं तमः ।। ७ ।।

ईश्वरः—

यत्र लक्षणया वृत्त्या भुवनस्थितिरीरिता ।
ततस्तत्प्रान्तवर्तिन्यां प्रकृतावेव कल्प्यताम् ।। ८ ।।

गङ्गायां ग्राम इत्युक्ते तत्तटः[9] कल्प्यते यथा ।

ऋषयः—

कलादिपञ्चतत्त्वानां बुद्धिर्भेदेन चोदिता ।। ९ ।।

प्रकृतेरपि यद्योगात् पुरुषः संमतस्त्विह ।
तस्य शुद्धिर्विभेदेन कीदृशी संशयस्ततः ।। १० ।।

---

1 °नकलास्तस्मात् Pr. 2 पुरुषाख्यं Pr. 3 निमित्तदा Pr.
4 °कलो Pr. 5 निमित्तदाः Pr. 6 यद्यविद्यादिः Pr.
7 च Pr. 8 °नि कृतानि हि Pr. 9 तटे Pr.

ईश्वरः—

नेह पुंस्तत्त्वसंशुद्धिर्भेदेन कथिता द्विजाः ।
तस्मात् प्रकृतितत्त्वात्तु श्रीकण्ठभुवनात्मकः ।। ११ ।।

यत्तत्त्वे तत्त्वविच्छित्त्यै [1]युञ्ज्यादुद्धृत्य पुद्गलम् ।
[2]तस्मिन् पुंस्त्वमले च्छिन्ने नाणोः पुंस्त्वस्वरूपता ।। १२ ।।

अथ भौवनदीक्षायां [3]शुद्धिस्तद्भुवनात्मनः ।

ऋषयः—

योऽयं पुंस्त्वमलः पूर्वं विद्याविद्यात्मको मतः ।। १३ ।।

कालाग्न्यादिषु सर्वेषु स्थानेष्वपि च विद्यते ।
कालाग्निर्भुवनेनैव मलो विच्छिद्यते कुतः ।। १४ ।।

ईश्वरः—

तत्रापि च्छिद्यते पुंस्त्वमलः स्थूलः समन्ततः ।
प्रकृतावेव सोऽत्यन्तं छिद्यते नापरत्र च ।। १५ ।।

अंत एव [4]प्रकृत्योर्ध्वगणना पुरुषस्य च ।
एवं पुरुष आख्यातः प्रकृत्यालिङ्गितः सदा ।। १६ ।।

अथ प्रकृतितत्त्वं तु क्रमायातं निरूप्यते ।
तच्च मायोद्भवं यत्तु कलान्तःस्थूलतां गतम् ।। १७ ।।

गुणादिक्षिति[5]पर्यन्ततत्त्वजातं यतो भवेत् ।
तदव्यक्तमिति प्रोक्तं क्षोभ्यं श्रीकण्ठविक्रमैः ।। १८ ।।

ऋषयः—

गुणा एव समावस्थां प्राप्ताः प्रकृतिरुच्यते ।
तत्कथं तदुपादानं प्रकृतिः प्रतिपाद्यते ।। १९ ।।

---

[1] युज्यादु° Pr. [2] अयमर्धश्लोकः भाष्ये गलितः, अपितु श्लोकस्य व्याख्या दृश्यते । [3] शुद्धिस्तु° Pr. [4] °त्योर्ध्वं Pr. [5] पर्यन्तं Pr.

ईश्वरः—

[1]न गुणानां समावस्था प्रकृतिः शिवशासने ।
[2]अचेतनत्वानेकत्वाद् गुणानां मुनिपुंगवाः ।। २० ।।

इष्टं कारणपूर्वत्वं तत्तु प्रकृतिसंज्ञितम् ।

ऋषयः—

क्रियाप्रकाशनिष्ठात्मा [3]रजादिगुण ईरितः ।। २१ ।।

प्रकृतेरपि ताद्रूप्याद् गुणेभ्यो नातिरिच्यते ।
मायादीनां च [4]ताद्रूप्याद् गुणात्मत्वं व्यवस्थितम् ।। २२ ।।

ईश्वरः—

न गुणात्मत्वतस्तेषां प्रकाशाद्यात्मता स्थिता ।
किंतु स्वभावसिद्धा सा कार्यत्वात् तद्गुणेष्वपि ।। २३ ।।

प्रकाशाद्यात्मना सिद्धा न गुणात्मतया द्विजाः ।
कार्यस्य जननं सत्त्वात् प्रकृती रजसा स्थिता[5] ।। २४ ।।

निवृत्तिस्तमसा सिद्धा श्रीकण्ठापेक्षिता कुतः ।
अचेतनत्वानेकत्वाद् गुणाः कार्यमुदाहृतम् ।। २५ ।।

स्वकीयजननाद्यास्तु किं गुणान्तरहेतुकाः ।[6]
[7]न चान्ये त्वनवस्थात्र जननाद्यात्मका हि ते ।। २६ ।।

जननाद्यास्ततः कर्तृसापेक्षा एव संस्थिताः ।
प्रकृतावकृताद्यास्तु मायायामिव संस्थिताः ।। २७ ।।

गुणतत्त्वे स्थितिस्तेषां मायेयानां कलात्मनि ।
एवं प्रकृतितत्त्वं तु समासादुपवर्णितम् ।। २८ ।।

---

[1] गुणानां तु° Pr. [2] अचेतने हेह्यनेक° Pr. [3] रज आदि Pr.
[4] तद्रूप्यात् Pr. [5] स्थिताः Pr. [6] हेतवः Pr. [7] नचान्यत्व Pr.

अथ प्रकृतितत्त्वात्तु गुणतत्त्वमजायत ।
सत्त्वादयः समावस्थां प्राप्तास्तत्त्वं गुणात्मकम् ।। २९ ।
[1]क्षोभकोग्रमहातेजा श्रीकण्ठोऽनन्तविक्रमः ।
प्रबुद्धः [2]परमेशानशक्तिसंपर्कमात्रतः ।। ३० ।।
सत्त्वं रजस्तमश्चेति गुणाः प्रकृतिसंभवाः ।
बुद्ध्यादेस्त्रिगुणात्मत्वादव्यक्तादगुणात्मतः ।। ३१ ।।
असंभवोदयत्वेन गुणात्मत्वमिहेष्यताम् ।

ऋषयः—

प्रकृतेर्गुणतत्त्वस्य यथेहोत्पत्तिरिष्यते ।। ३२ ।।
तथा बुद्ध्यादितत्त्वानां प्रकृतेर्नेष्यते कुतः ।

ईश्वरः—

अत एव गुणात्मत्वं गुणतत्त्वस्य नेष्यते ।। ३३ ।।
प्रकृतेर्गुणवत्वं तु भिद्यते न च वस्तुतः ।
सैव त्रिधा विभक्ता तु श्रीकण्ठेन महात्मना ।। ३४ ।।
तस्माद् बुद्ध्यादितत्त्वानि गुणादेवोदितानि तु ।
अव्यक्तगुणसाम्यं तु प्रधानं परिपठ्यते ।। ३५ ।।
विभक्तगुणसाम्यं तु गुणतत्त्वमिहोदितम् ।
विभक्तगुणवैषम्यं तत्त्वं बुद्ध्यादिकं द्विजाः ।। ३६ ।।
[3]स्थैर्यं धैर्यं तथा दाक्ष्यं मार्दवं लघुतापि च ।
संतोषमार्जवं शौचं व्यवसायः[4] क्षमा स्मृतिः ।। ३७ ।।
सौहित्यं परमौत्सुक्यं दान्तिः शान्तिर्दया परा ।[5]
सत्त्वस्य वृत्तयः प्रोक्ताः रजसश्चाथ[6] कथ्यते ।। ३८ ।।

---

[1] क्षोभकोऽत्र Pr. [2] परमेशानः Pr. [3] स्थैर्यशाये Pr.
[4] व्यवसायक्षमा Pr. [5] परादया Pr. [6] श्चापि Pr.

शौर्यं क्रौर्यं महोत्साहः साभिमानः सकल्कता ।
दार्ढ्यं च निर्दयत्वं च भोगो दम्भो रजोगुणः ।। ३९ ।।

अरतिर्मन्दता दैन्यं पैशुन्यं गुरुता तथा ।
निद्राधिक्यं मदालस्ये निरोधो मूढता च या ।। ४० ।।

तमसो वृत्तयः प्रोक्ताः विभिन्नाः सर्वजन्तुषु ।
एवं संक्षेपतो विप्राः गुणतत्त्वमुदाहृतम् ।। ४१ ।।

गुणतत्त्वात् परा बुद्धिरभवन्मुनिपुंगवाः ।
रजस्तमोभ्यां न्यग्भूता वृत्तिस्तत्त्वेन चोत्कटा ।। ४२ ।।

सा बुद्धिरुदिता तन्त्रे [1]विषयाध्यवसायिनी ।
[2]बोधोऽत्र विविधो भावो व्यवसायात्मकस्तथा ।। ४३ ।।

[3]आद्योऽनध्यवसायात्मा व्यवसायात्मकस्तु यः ।
सा बुद्धिरितरस्त्वात्मस्वभावो ग्राहकात्मकः ।। ४४ ।।

किंच प्रपातटाकादिक्रियाः क्लृप्ताः फलार्थिभिः ।
समनन्तरमेवेह न यच्छन्ति फलानि तु ।। ४५ ।।

आमुष्मिकत्वात् किंतूर्ध्वं विनष्टा अपि ताः क्रियाः ।
फलकालानुवृत्तित्वात् संस्कारोऽपूर्वसंज्ञितः ।। ४६ ।।

[4]कल्प्यते पुंसि न स्यात्तु विकारित्वेन हेतुना ।
कृष्यादेरपि संस्कारो[5] न पुंसि परिदृश्यते ।। ४७ ।।

[6]यत्र कुर्वन्ति संस्कारं क्रिया साष्टगुणा मतिः ।
एवं ज्ञानादिसंस्कारोऽप्यूह्यतां मुनिपुंगवाः ।। ४८ ।।

धर्मो ज्ञानं च वैराग्यमैश्वर्यं बुद्धिवृत्तयः ।
त्रयोऽत्र धर्ममुख्यास्तु सात्त्विकाः परिकीर्तिताः ।। ४९ ।।

---

[1] व्यवसायात्मस्तया Pr. [2] बोधः प्रोक्तः Pr. [3] अन्यो व्यव° Pr.
[4] पुंसि तस्मात् सोऽपि Pr. [5] संस्कारात् S.P. [6] कुर्वन्ति यत्र संसारं Pr.

रागस्तु राजसः[1] शिष्टास्तामसाः परिकीर्तिताः ।
एते धर्मादयश्चाष्टौ भावयन्ति यतस्ततः ।। ५० ।।

[2]लिङ्गभावात् समुद्दिष्टा वर्ण्यन्ते[3] ते क्रमेण तु ।
धर्मश्च द्विविधस्तत्र यमश्च नियमस्त्विति ।। ५१ ।।

चित्तस्य [4]संयमस्तत्र स यमः परिपठ्यते ।
अशास्त्रीयक्रियात्यागाच्छास्त्रीयेष्वपि कर्मसु ।। ५२ ।।

नियमः पठ्यते शास्त्रे योऽयमिन्द्रियसंयमः ।
यमः पञ्चविधोऽहिंसा सत्यमस्तेयमेव च ।। ५३ ।।

ब्रह्मचर्यमकल्कत्वं यम एवं तु पञ्चधा ।
अक्रोधो गुरुशुश्रूषा शौचं संतोष एव च ।। ५४ ।।

आर्जवं चेति नियमः पञ्चधा परिकीर्तितः ।
परेषु दुःखानुत्पादो[5] हिंसाद्रोहशतैरपि ।। ५५ ।।

सा न हिंसेति विज्ञेया या हिंसा शास्त्रचोदिता ।
आपदो भीतितो वापि न तथ्यं सत्यमुच्यते ।। ५६ ।।

असत्यमपि तत्सत्यं गुरुदेवप्रयोजनम् ।
अदत्तास्वीकृतिस्त्यागो वित्तस्यान्यायजस्य च ।। ५७ ।।

श्रुतस्य परिदृष्टस्य तृणीकारोऽप्यचोरता ।
कर्मणा मनसा वाचा श्रवणाद् दर्शनादपि ।। ५८ ।।

मातृवन्मन्यते नित्यं [6]प्रार्थयन्तीमपि स्त्रियम् ।
तदेव ब्रह्मचर्यं स्याच्छेषा व्रतविडम्बकाः ।। ५९ ।।

स्वच्छता समता प्रीतिरपकारशतैरपि ।
कालुष्यं नोत्सहेद् वैरं [7]सेयमुक्ता ह्यकल्कता ।। ६० ।।

---

1 रजसाः Pr. 2 लिङ्गभावाः Pr. 3 °तेऽत्र Pr. 4 स यमं Pr.
5 °नुत्पात° Pr. 6 प्रार्थयन्त्वामपि Pr. 7 सोऽयमुक्ता° Pr.

एते पञ्च यमाः प्रोक्ता यतीनां सुशिवात्मनाम् ।
नित्यं प्रध्वस्तकालुष्यो न कोपस्ताडनादपि ।। ६१ ।।

देवानां शिवभक्तानां पित्रोरपि गुरोरपि ।
[1]आज्ञानुपालनं नित्यकाम्यनैमित्यकर्मणाम् ।। ६२ ।।

दानोपवासतीर्थानां श्रुताध्ययनयोरपि ।
श्रद्धया करणं पुंसां शुश्रूषा परिकीर्तिता ।। ६३ ।।

गात्रप्रक्षालनं शौचं मृदम्भोभ्यामुदाहृतम् ।
[2]संतोष उदितस्तन्त्रे लाभालाभे समा मतिः ।। ६४ ।।

जानन्नपि च विप्रेन्द्राः जडवन्मूकवत्तथा ।
निवृत्तः परपीडायाः श्रद्दधानश्च भावितः[3] ।। ६५ ।।

आर्जवं तस्य तत्प्रोक्तं नियमस्त्विति पञ्चधा ।
ज्ञानं [4]पञ्चात्मकं यत्तद् गुणा[5]व्यक्तनृगोचरम् ।। ६६ ।।

तस्मात् कैवल्यसंसिद्धिरिति तत् सिद्धिरुच्यते ।
अशीतिसंख्यया सा च संक्षेपात् परिकीर्तिता ।। ६७ ।।

भूततन्मात्रकाक्षाणि मनोऽहंकारबुद्धयः ।
गुणाव्यक्तनराश्चैव प्राप्यस्थानानि वासिनाम् ।। ६८ ।।

[6]तत्र तत्रात्मबुद्धैचव गम्यन्ते सिद्धयस्ततः ।
चार्वाका भूतसंसिद्धा यतो देहात्मवादिनः ।। ६९ ।।

ज्योतिःशास्त्रविदस्तद्वत् प्राप्यं तारापुरं यतः ।
कौलाश्च [7]स्वात्मवादेन विनाशित्वात्तु भौतिकाः ।। ७० ।।

भूताण्डकारणं ब्रह्मेत्याहुः स्मार्तास्ततश्च ते ।[8]
ज्ञेयास्तन्मात्रसंसिद्धाश्चक्षुरादीन्द्रियं परे ।। ७१ ।।

---

[1] आज्ञानुपालनात् Pr. [2] संतोषमुदितः Pr. [3] भावतः Pr.
[4] बुद्ध्यात्मकं Pr. [5] °व्यक्तान्तगोचरम् Pr. [6] अयमर्धश्लोकः मुद्रितकोशे नापलभ्यते । [7] वायव्यात्मेन Pr. [8] °र्ताश्च तद्वतः Pr.

चेतनं मन्यमानास्तत्सिद्धा मुनिषु केचन ।
बौद्धास्तु बुद्धिसंसिद्धा ज्ञानवृत्त्यात्मवादिनः ।। ७२ ।।

तद्वन्नचायविदो बुद्धिवृत्तिधर्मात्मवादिनः ।
स्याद्वादिनस्त्वनेकान्तमात्मानं पर्युपासते ।। ७३ ।।

गुणानां चलवृत्तित्वाद् गुणसिद्धास्तु ते पुनः ।
प्राकृताः [1]पाञ्चरात्राश्च मन्यन्ते प्रकृतिं हरिम् ।। ७४ ।।

प्रधानाक्रान्तपुंसिद्धा वेदान्तज्ञाः प्रकीर्तिताः ।
पुरुषः सर्व इत्येवं मन्यन्ते परिणामिनः ।। ७५ ।।

सांख्याः पुरुषसंसिद्धाः कलाक्रान्तः स च स्मृतः ।
दशैवं सिद्धयः प्रोक्ता दर्शनान्तरभेदतः ।। ७६ ।।

एषा मुक्तिः परा काष्ठा आश्रमस्यायमन्तिमः ।
इति निश्चित्य [2]संतुष्टास्तेषां ताः सिद्धयः पराः ।। ७७ ।।

तन्त्रेऽस्मिन्नपराः प्रोक्ता यावत् तत्त्वं लयाह्वयम् ।
एताश्चोपाधिभेदेन भिद्यन्ते पुनरष्टधा ।। ७८ ।।

प्राक्संस्कार[3]वशेनोहरूपं ज्ञानं प्रवर्तते ।
सैका दुःखत्रयेण स्यात् सिद्धिर्विनिहतस्य यत् ।। ७९ ।।

[4]तद्विघातत्रयाज्ज्ञानत्रयं तिस्रस्तु सिद्धयः ।
[5]सुहृदामुपदेशेन तच्चैका[6] सिद्धिरिष्यते ।। ८० ।।

स्वयं वा शास्त्रमालोच्य गुरुतोऽध्ययनात्तु वा ।
यज्ज्ञानद्वितयं पुंसस्तत् सिद्धिद्वयमिष्यते ।। ८१ ।।

दानादिकर्मभिर्भाव्यो यः सैका सिद्धिरुच्यते ।
आभिः सिद्धिभिरष्टाभिर्भिद्यन्ते दश सिद्धयः ।। ८२ ।।

---

[1] पञ्चरात्राश्च Pr. [2] संतुष्टः Pr. [3] °वशेनेहरूपं Pr.
[4] °त्रयेण ज्ञानत्रयं तिसृसिद्धयः Pr. [5] सुव्रता° Pr. [6] तद्वैका Pr.

मिलित्वाशीतिसंख्याताः सिद्धयस्ताः समासतः ।
इत ऊर्ध्वं कलादौ ये [1]परकाष्ठा हि मानिनः ।। ८३ ।।

न तेऽपि सिद्धा गण्यन्ते बुद्धिसिद्धेरुपक्रमात् ।
न हि विद्याकलादीनां दर्शनं संभवेद् द्विजाः ।। ८४ ।।

पुरुषोपरि यत्तत्त्वं शिवतन्त्रैकगोचरम् ।
पुंसां तन्निष्ठता [2]न स्याद् विशेषानुग्रहादृते ।। ८५ ।।[3]

तस्मादनुग्रहाच्छक्तिः पतिता बोधयत्यणून् ।
शिवदीक्षादिनोद्भूतममलं सर्वतोमुखम् ।। ८६ ।।

शिवत्वोन्मीलितं ज्ञानं शिवशक्त्यात्मकं भवेत् ।
श्रेयःप्रकाशकं शैवे न तु बुद्धिः प्रकाशिका ।। ८७ ।।

अथ वैराग्यभेदोऽपि संक्षेपेणाधुनोच्यते ।
व्याध्यादिपीडितस्यास्य स्वदेहेऽपि विरागता ।। ८८ ।।

संतुष्टः सर्वकार्येषु निःस्पृहत्वांज्जुगुप्सति ।
आध्यात्मिकादिदुःखेभ्यो वैराग्यं नियतं भवेत् ।। ८९ ।।

आर्जने रक्षणे चोरहरणे द्रविणस्य यत् ।
दुःखं तन्मन्यमानस्य वैराग्यं सहसा भवेत् ।। ९० ।।

स्निग्धाद् वियुज्यमानः सन् [4]रुदन् दुःखेन पीडितः ।
दुःखस्य कारणं स्नेह इति मत्वा विरज्यति ।। ९१ ।।

कामुकः स्वस्त्रियं दृष्ट्वा किंचिद् वैराग्यकारणम् ।
सद्यो वैराग्यमायाति श्रेयसः प्राप्तिकारणम् ।। ९२ ।।

[5]सत्यन्ने ध्रियते देहः पानीयादौ न चान्यथा ।
एकाहस्याप्यपायेन[6] ग्लानिं समुपगच्छति ।। ९३ ।।

---

[1] पर काष्ठा हि Pr. [2] तस्याः Pr. [3] नुग्रहादृताम् Pr.
[4] ऋते Pr. [5] सत्यं नोद्ध्रियते Pr. [6] °स्याप्यपानेन Pr.

दुष्पूरोऽयमतो हेतोर्वैराग्यमुपजायते ।
क्वचित् प्रतिग्रहादिभ्यो वैराग्यमुपगच्छति ।। ९४ ।।

अकस्माज्जायते कश्चिद् विरक्तः पुण्यवैभवात् ।
इत्येवं तुष्टयः प्रोक्ता दशधा शिवशासने ।। ९५ ।।

अत्रैवान्तर्गताः सर्वास्तुष्टयोऽन्या द्विजोत्तमाः ।
एताश्च भूताद्यव्यक्तास्तत्त्वानां प्रापकत्वतः ।। ९६ ।।

संभूय शतसंख्याः स्युस्तुष्टयः शिवशासने ।
अथैश्वर्यविभेदोऽपि लक्ष्यते लेशतोऽधुना ।। ९७ ।।

बुद्ध्यात्मनोर्विभागेन स्थितमैश्वर्यमष्टधा ।
धर्मिणो ज्ञाननिष्ठस्य विरागेच्छोश्च धीमतः ।। ९८ ।।

सत्त्वमुत्पादयेद् बौद्धमणोरैश्वर्यमिच्छया ।
[1]अणिमा परमाण्वादेरपि सूक्ष्मतरा स्थितिः[2] ।। ९९ ।।

लघिमा शीघ्रवेगित्वं पङ्कादावप्यमज्जनम् ।[3]
महिमा व्याप्य च स्थानं बृहद्देहेन्द्रियादिभिः ।। १०० ।।

[4]त्रितयं कार्यतः [5]सिद्धमैश्वर्यमणिमादिकम् ।
प्राप्त्यादयो गुणाः पञ्च योगिभिः [6]करणात्मजाः ।। १०१ ।।

मनसाभीष्टसंसिद्धिः[7] प्राप्तिर्नाम गुणालयः ।
निर्माय स्त्रीसहस्राणि क्रीडा प्राकाम्यमाशु या ।। १०२ ।।

आज्ञाविधानं [8]ब्रह्मादौ तत्पूजा[9] चेशिता मता ।
वशीकृतिर्वशित्वं स्याज्जगन्निर्माणमेव च ।। १०३ ।।

भुञ्जानस्यास्य कर्माद्यै[10]रबाधो गरिमा मता ।
पिशाचानां यथोद्दिष्टमणिमादिगुणाष्टकम् ।। १०४ ।।

---

[1] धर्मणः Pr. [2] स्थिता Pr. [3] °प्यमार्जनम् Pr. [4] तृतीयं Pr.
[5] सिद्धेरैश्वरं Pr. [6] कारण° Pr. [7] सिद्धः Pr. [8] ब्रह्मादेः Pr.
[9] °पूजाः Pr. [10] रबाधा शिवता मता Pr.

रक्षसां द्विगुणं ज्ञेयं यक्षाणां त्रिगुणं भवेत् ।
चतुर्गुणं तु [1]गान्धर्वमैन्द्रं पञ्चगुणं भवेत् ।। १०५ ।।

सोमानां षड्गुणं[2] सप्तगुणं स्यात्तु प्रजापतेः ।
चतुःषष्टिगुणं बोद्धमैश्वर्यं ब्रह्मणः स्मृतम् ।। १०६ ।।

ततः समासादैश्वर्यं चतुःषष्टिगुणं मतम् ।
ततस्त्वैश्वर्यमोहेन[3] विषयेष्वभिसंस्थिताः ।। १०७ ।।

[4]चरन्ति क्षीणकर्माणः शुचीनां श्रीमतां गृहे ।
ततोऽधर्मेण युज्यन्ते भोगनिद्रामदाकुलाः ।। १०८ ।।

[5]हिंसायामपि चौर्ये वा मिथ्याकथन एव वा ।
गुर्वङ्गनाभिगमनमपकारप्रतीकृतौ ।। १०९ ।।

क्रोधे नित्यादिलोपे [6]वाशौचे वातोष एव वा ।
अनार्जवे[7] च सततं प्रवर्तन्तेऽन्ध[8]दृष्टयः ।। ११० ।।

अधर्मवृत्त[9]यस्त्वेता दशसंख्यास्तु पूर्ववत् ।
अथाधर्मप्रवृत्तं तमणुमज्ञानसंततौ ।। १११ ।।

नियुनक्ति महेशानो यथा मूढो न पश्यति ।
तमोमोहमहामोहस्तामिस्रं चान्धपूर्वकम् ।। ११२ ।।

तामिस्रमिति पञ्चैवं मता[10] अज्ञातवृत्तयः ।
अनात्मन्यात्मभावो यः स तमः परिकीर्तितः ।। ११३ ।।

भूताद्यव्यक्तपर्यन्ततत्त्वदर्शनभेदतः ।
दशधा तम उद्दिष्टं मोहस्त्वष्टविधो मतः ।। ११४ ।।

अणिमादिषु लब्धेषु [11]परत्वप्रतिपत्तितः ।
दिव्यादिव्यविभेदेन शब्दादिषु दशस्वपि ।। ११५ ।।

---

[1] गन्धर्व° Pr. [2] गुणः Pr. [3] °श्वर्यभेदेन Pr. [4] क्षरन्ति Pr.
[5] हिंसावापिच Pr. [6] वा शौचे Pr. [7] °जवेन Pr. [8] न दृष्टयः Pr.
[9] °यश्चैताः Pr. [10] °तात्वज्ञान° Pr. [11] परत्वः प्रति Pr.

परताध्यवसायो यो महामोहः प्रकीर्तितः ।
शब्दादीनां दशानां च दिव्यादिव्यविभेदतः ।। ११६ ।।

अणिमाद्यष्टकस्यापि वैकल्यात् साधनेऽथवा ।
प्राप्तानां नाशतस्तापो यस्तामिस्रं प्रकीर्तितम् ।। ११७ ।।

शब्दादावणिमादौ तु भुज्यमाने परेण तु ।
तत्सुखाहरणे[1] यस्तत् तामिस्रं चान्धपूर्वकम् ।। ११८ ।।

ततश्चाज्ञानभेदो[2] यश्चतुःषष्टिविधो मतः ।
अवैराग्यं च शतधा तुष्टीनां व्यत्ययात्मतः[3] ।। ११९ ।।

न जुगुप्सादयः सर्वपदार्थेषु तदा नृणाम् ।
अष्टभेदमनैश्वर्यमैश्वर्यं व्यत्ययात्मकम् ।। १२० ।।

तच्चाशक्त्या भवेत् सा च षट्सप्तत्यधिकं शतम् ।
अज्ञानातुष्टिरूपत्वाच्चतुःषष्ट्युत्तरं शतम् ।। १२१ ।।

[4]बुद्ध्यशक्तिस्त्वतुष्टिः स्यात् करणस्यार्कसंख्यया ।
अशक्तिरेव संक्षेपात् षट्सप्तत्यधिकं शतम् ।। १२२ ।।

इति धर्मादयो भावा [5]बुद्धिस्था वासनात्मना ।
क्रमेण प्रत्ययात्मानः प्रोक्तास्तद् वृत्तिभेदतः ।। १२३ ।।

[6]प्रत्याययन्ति क्षेत्रज्ञं तेन ते प्रत्ययाः स्मृताः ।
धर्मो दशविधो ज्ञानमशीतिः शतसंख्यया ।। १२४ ।।

विरागो[7]ऽष्टाष्टधैश्वर्यमधर्मो दशधा मतः ।
अज्ञानं तु चतुःषष्टिरवैराग्यं शतं भवेत् ।। १२५ ।।

---

1 °खाहरणं पूर्वं Pr. 2 भेदोऽयं Pr. 3 °त्मनः Pr. 4 बुद्ध्या शक्त्यनुष्टस्व Pr. 5 संस्थिता Pr. 6 क्षेत्रज्ञः प्रत्ययायन्ति Pr.
7 °ष्टधैश्वर्य° Pr.

[1]अष्टसंख्यमनैश्वर्यं षट् त्रिंशच्च चतुःशतम् ।
षट् सप्तत्यधिका शक्तिः संख्यया शतधा मता ।। १२६ ।।

संभूय वृत्तयो बुद्धेः षट्शतं द्वादशाधिकम् ।
एवं संक्षेपतः प्रोक्तो बुद्धिर्भावाष्टकात्मिका ।। १२७ ।।

अष्टारेऽस्मिन् महाचक्रे[2] पर्यटन्ति पुनः पुनः ।
पुद्गलास्तेन तेषां तु नान्तं पश्यन्ति पुद्गलाः ।। १२८ ।।

अत ऊर्ध्वमहंकारतत्त्वं संक्षिप्य वर्ण्यते ।
प्रत्यात्मनियतं तच्च प्रसिद्धमहमात्मकम् ।। १२९ ।।

मनःपूर्व[3]मधस्तत्त्वमत एवोपजायते ।

ऋषयः—

प्रत्ययो[4] योऽहमात्मात्र व्यवसायात्मको यतः ।। १३० ।।

बुद्धेरेव ततो भूयात् किमनेन वदेश्वर ।

ईश्वरः—

विषयाध्यवसायो य प्रत्यर्थं भेदतः स्थितः ।। १३१ ।।

[5]अयमित्यात्मकः सर्वो[6] बुद्धिशब्देन गण्यते ।
अहमात्मैकरूपस्तु सर्वदा संव्यवस्थितः ।। १३२ ।।

ग्राहकव्यवसायात्मा बुद्धिरेषा कथं भवेत् ।
विषयाभिमुखी बुद्धिरहंविषयसंग्रहः ।। १३३ ।।

ऐकत्यं कथं तयोर्विप्राः कथ्यतेऽत्यन्तभिन्नयोः ।
अहंकृदेकमेष्टव्यं सर्वेषा[7]महमात्मनः ।। १३४ ।।

प्रत्ययस्योदयात् तत्किं प्रत्यात्मनियतं भवेत् ।
इदमित्येव सर्वत्र धीस्तावदुपजायते ।। १३५ ।।

---

[1] 'अष्ट संख्य . . . . . मता' मुद्रितकोशे अयश्लोकः नोपलभ्यते ।
[2] पर्यसन्त° Pr. [3] °मयस्तत्त्वं Pr. [4] °योऽधो S.P. °योऽथोऽह° Pr.
[5] अहमित्या° Pr. [6] सर्वा Pr. [7] °षांविषयात्मनः Pr.

नैतावता तदेकत्वं वाच्यं प्रत्यक्षबाधतः ।
किंच सर्वेषु कुम्भेषु कुम्भ इत्येव जायते ।। १३६ ।।

सर्वेषां प्रत्ययोऽथापि कुम्भैकत्वं न प्रदृश्यते ।
प्रत्यात्मनियतोऽहंकृद् गच्छामीति च वर्तते ।। १३७ ।।

एकस्यान्यस्य पश्यामीत्येवं बुद्ध्यादयस्तदा ।
अन्यथैकप्रका[1]राहंमतिः स्यादुभयोरपि ।। १३८ ।।

अहंकारः पृथक्सार्वजनीन इति बुद्ध्यताम् ।
[2]यद्यहंकृदभिन्नं स्याद् देवदत्तेऽप्यहंमतिः ।। १३९ ।।

अन्यस्याप्युपजायेत नात्मैकत्वं ततः स्थितम् ।
स च त्रिविध उद्दिष्टः प्रथमस्तत्र तैजसः ।। १४० ।।

वैकारिको द्वितीयः स्यात् तथा भूतादिकः परः ।
सत्त्वेनोत्कृष्टभागो यः स तैजस इहोच्यते ।। १४१ ।।

वैकृतो रजसोत्कृष्टो भूतादिस्तमसाधिकः ।
तैजसादप्यहंकारान्मनो बुद्धीन्द्रियाणि च ।। १४२ ।।

पञ्च कर्मेन्द्रियाणि स्युरहंकारात्तु वैकृतात् ।
अहंकारात्तु भूतादेर्जाता तन्मात्रसंहतिः ।। १४३ ।।

यः संकल्पविकल्पात्मा प्रत्ययोऽन्तर्गतो नृणाम् ।
स नाहंकारिको नापि बौद्धो व्यापारभेदतः ।। १४४ ।।

स तु मानस एवेष्टस्तन्त्रेऽस्मिन् मुक्तिसागरे ।
चक्षुषालोचिते ह्यर्थे तमर्थं बुद्धिगोचरम् ।। १४५ ।।

विदधातीह यद्विप्रास्तन्मनः परिपठ्यते ।
अन्यथालोचिते ह्यर्थे घटेऽपि स्याद्विनिश्चयः ।। १४६ ।।

---

[1] °रोऽहमतिः Pr. [2] यद्यहं . . . . . स्थितम् इत्ययं श्लोकः मुद्रितकोशे नोपलभ्यते ।

किंच सास्नादिमत्पिण्डे गोशब्दमनुभूय यत् ।
भूयस्तत् सदृशे दृष्टे गोशब्दोच्चारहेतुकम् ।। १४७ ।।

तन्मनः कथ्यते तन्त्रे विकल्पप्रत्ययात्मकम् ।
केचिन्मनोऽणुमिच्छन्ति क्रमेणार्थविराजनात् ।। १४८ ।।

महच्चेत् सर्वदा सर्वपदार्थावगतिर्भवेत् ।
तदसत्कर्मवशतः क्रमज्ञानोदयो नृणाम् ।। १४९ ।।

[1]सामग्र्यपेक्षातश्चापि तमसाभिभवादपि ।
मनोऽणुश्चेदणुद्रव्यग्राहकं सर्वदा भवेत् ।। १५० ।।

यावति ग्राहकव्याप्तिस्तावद् ग्राह्यं च गृह्यते ।
दीपेन ग्रहणं यद्वन्न तथादित्यरश्मितः ।। १५१ ।।

अल्पार्थग्राहकत्वेन मनोऽल्पमिति चेन्मतिः ।
तदसन्महतोऽप्यल्पग्रहणं परिदृश्यते ।। १५२ ।।

महदेव मनस्तत्त्वं प्रत्यात्मनियतं च यत् ।

ऋषयः—

मनोऽहंकृद्भिदस्तिस्रः संहतार्थार्थनिश्चयात् ।। १५३ ।।

केचिदाहुः क्रमेणेति को नयः स्वीकृतस्त्वया ।

ईश्वरः—

क्रमेणैवार्थसंवित्तिः पूर्वमालोचनात्मिका ।। १५४ ।।

संदेहरूपिणी पश्चादभिमानात्मिका ततः ।
व्यवसायात्मिका पश्चात् क्रमेणैवं व्यवस्थिता ।। १५५ ।।

ननु सर्वत्र बोधानुवृत्तेर्धीः सर्वगेति चेत् ।
तदसत् परसंवित्तिः सा हि बुद्धिर्जडोदिता ।। १५६ ।।

---

[1] °ग्र्यपेक्षितश्चापि Pr.

ततः क्रमेण नेत्राद्याः पर्याप्ताभावनिश्चये ।
एवं प्रसाधिते चान्तःकरणत्रितयेऽधुना ।। १५७ ।।

बुद्धीन्द्रियाणि कथ्यन्ते श्रोत्रं त्वक्चक्षुरेव च ।
जिह्वा घ्राणं च पञ्चेति सुप्रसिद्धानि तानि च ।। १५८ ।।

प्रत्यक्षविषयत्वेन तेषां सिद्धेर्न युक्तयः ।
कथ्यन्ते तान्यहंकारादुपजातानि सात्त्विकात् ।। १५९ ।।

ऋषयः—

यदभिव्यञ्जकं यस्य सजातीयं हि तस्य तत् ।
यथाभिभूतगन्धस्य निम्बत्वक्चन्दनस्य च ।। १६० ।।

शब्दाभिव्यञ्जकं श्रोत्रमाकाशात्मकमेव तत् ।
त्वगादेश्चैवमुन्नेय[1]माहंकारिकता कथम् ।। १६१ ।।

ईश्वरः—

भौतिकत्वेन मूर्तत्वमिन्द्रियाणां घटादिवत् ।
ग्राह्यत्वं चेन्द्रियैरन्यैरवस्थानं न कुत्रचित् ।। १६२ ।।

किंच मूर्तोपरोधेन मूर्तानां [2]ग्रहणं न हि ।
स्फटिकान्तर्गतं वस्तु न गृह्णीयात्तु लोचनम् ।। १६३ ।।

पानीयान्तर्गतं वापि तस्माच्चक्षुर्न तैजसम् ।

ऋषयः—

यद्येवं सति कुड्यान्तर्निहितस्यापि वस्तुनः ।। १६४ ।।

ग्रहणं स्यादमूर्तत्वे नाहंकारोद्भवत्वतः ।

ईश्वरः—

तदसत् तामसत्वेन कुड्यादेर्गतिरोधतः ।। १६५ ।।

---

1 °महंकारिकता Pr. 2 क्रमणं Pr.

व्यङ्ग्यव्यञ्जकयो[1]र्यत्तु सजातीयत्वमीरितम् ।
तदप्यचारु यत्कर्मजात्योर्द्विवषयत्वतः ।। १६६ ।।

रूपैकविषयं नातस्तैजसत्वं न हीयते ।
तथात्वे [2]तद्दविष्ठार्थग्रहणं नोपपद्यते ।। १६७ ।।

नाप्राप्तग्रहणं दृष्टं यथा किं व्यवधानतः ।
प्राप्तमेवेन्द्रियं सर्वं गृह्णाति त्वग्यथेन्द्रियम् ।। १६८ ।।

किंच [3]मूकाद्यनुत्पत्तिर्देहाङ्गत्वे प्रसज्यते ।
[4]घ्राणाद्यवयवोपेतो मूकादिःपरिदृश्यते ।। १६९ ।।

ततो व्यापकमेवेष्टं चक्षुर्दूरार्थदर्शने ।
श्रोत्रादीनि क्रमोक्तानि तद्ग्राह्याः पञ्च च क्रमात् ।। १७० ।।

भूतपञ्चकसंबद्धशब्दानां ग्राहिका श्रुतिः ।[5]
ततोऽवशिष्टभूतेषु स्पर्शस्त्वग्ग्राह्य इष्यते ।। १७१ ।।

एवमन्येष्वपि ज्ञेयं तद्ग्राह्याः पञ्च च क्रमात् ।
श्रोत्रत्वग्लोचनादीनां क्रमेणोत्पत्तिरीरिता ।। १७२ ।।

ऋषयः—

ननु गोलकमेवेष्टं चक्षुः कैश्चित् सहेतुकम् ।
सान्तरग्रहणाच्छाखाचन्द्रयोर्युगपत्स्थितेः ।। १७३ ।।

स्थूलार्थग्रहणाच्चैव तथा किमिति नेष्यते ।

ईश्वरः—

गोलकादीन्द्रियत्वेन सान्तरग्रहणं मनः[6] ।। १७४ ।।

व्याप्तमेव हि गृह्येत ग्राहको दीपवन्मतः ।
गोलकस्य तदव्याप्त्या चाक्षुष्यं दूरवारितम् ।। १७५ ।।

---

[1] °योर्युक्तं Pr. [2] तदपीष्टार्थं° Pr. [3] यूकादि° Pr.
[4] प्राणाद्य° Pr. [5] श्रुतम् Pr. [6] मतम् Pr.

पृथ्वर्थग्रहणं यत्तद् व्यापकत्वेन युज्यते ।
नो चेद् गोलकमात्रस्य भावस्य ग्रहणं भवेत् ।। १७६ ।।
एककाले तु शाखेन्द्वोर्ग्रहणं व्यापकत्वतः ।
वस्तुस्थित्या तु शाखेन्द्वोर्ग्रहणं नैककालजम्[1] ।। १७७ ।।
आशुत्वेनाभिमानं तत् सहस्रदलभेदवत् ।

ऋषयः—

ननु गोलकमेवेष्टमाधारत्वेन चक्षुषः ।। १७८ ।।
यत्रैवाधारसद्भावस्तत्राधेयो व्यवस्थितः ।
व्यापकत्वेन या [2]सत्ता सा त्वत्किंचित्करी मता ।। १७९ ।।
व्यापकोऽपि यथा जीवो व्योमदेशेन बोधकः ।
कथं पुनर्दविष्ठार्थं प्राप्य गृह्णाति लोचनम् ।। १८० ।।

ईश्वरः—

[3]तदसत्तैजसत्वेन गोलकस्य बहिष्कृतेः ।
दीपवत् तत्कृतास्थानं चक्षुर्गृह्णाति [4]नाद्भुतम् ।। १८१ ।।
दीपेनोपकृतं चक्षुस्तमसीवार्थसंचयम् ।
ततो गन्धादिनोक्तेन प्रसङ्गो दूरवारितः ।। १८२ ।।
चक्षुराधारभूतस्य गोलकस्याप्रवृत्तितः ।
ननु नायनतेजोभिर्निःसृतैर्मीलितेऽपि[5] च ।। १८३ ।।
अर्थो गृह्येत तन्नाशुविनाशान्मीलितोत्तरम् ।
घटान्तःस्थस्य दीपस्य प्रभा इव पिधानतः ।। १८४ ।।
[6]दृशो गोलकमात्रत्वे ह्यप्राप्तग्रहणं भवेत् ।
यद्यप्राप्तं च गृह्णीयात् तत्तत्स्याद् व्यवधानतः ।। १८५ ।।

---

[1] कालजः Pr. [2] सक्ता Pr. [3] तदसज्जडत्वेन . . . . वहिः स्थितम् Pr.
[4] नोद्भुतम् Pr. [5] °मीलितैरपि S.P. [6] दृशोर्गो Pr.

तस्माद् व्यापकमेवेष्टं चक्षुर्दूरार्थदर्शने ।
एवं सति त्वगादेश्च गत्वार्थग्रहणं भवेत् ।। १८६ ।।

इति चेत्तन्न वाय्वादिभूताधिष्ठानगोचरम् ।
गत्वार्थग्रहणं नैषां[1] किंतु प्राप्तार्थमापकाः ।। १८७ ।।

ऋषयः——

नेत्रवच्छ्रवणं गत्वा न गृह्णाति यदि ध्वनिम् ।
दिग्देशोपहितः शब्दः कथमत्रोपपद्यते ।। १८८ ।।

ईश्वरः——

तदसद् वेगतः शब्दः संतत्या श्रोत्रमागतः ।
बाणादिपातवत् सद्यो दिग्देशाननुमापयेत् ।। १८९ ।।

तदा प्रागनुभूत्यैव भेर्याद्यनुमितिश्च या[2] ।
गृह्णन्ति प्राप्तमेवार्थमिन्द्रियाणीत्यतः स्थितम् ।। १९० ।।

नैकमिन्द्रियमेवेष्टं चक्षू रूपाद्यवेदनात् ।
भूतभाविभवत्कालभाविभावेषु भावतः ।। १९१ ।।

अभिमानानुसंधाननिश्चयैः करणत्रयम् ।
दिक्कालविषयं बाह्यं वर्तमानैकगोचरम् ।। १९२ ।।

आन्तरं बाह्यसापेक्षं बहिरर्थावलोकने ।
आन्तरे सति बुद्ध्यादौ रूपाद्यनवभासनात् ।। १९३ ।।

कर्मेन्द्रियाणि सार्थानि धीन्द्रियोपकृतानि च ।
अज्ञाते करणायोगान्नैवं बुद्धीन्द्रियाणि तु ।। १९४ ।।

कर्मेन्द्रियाणि वाक्पादपाणिगुह्यगुदानि च ।
ज्ञानेन्द्रियाणां ज्ञातृत्वहेतुत्वात् कृत्ययोगतः ।। १९५ ।।

---

[1] तेषां Pr. [2] वा Pr.

तदर्थमेष्टव्यानीह पञ्चकर्मेन्द्रियाणि तु ।
कर्मात्र समवेताया क्रियासक्ता हि पुद्गले ।। १९६ ।।

तदभिव्यञ्जकं यत्तत् कर्मेन्द्रियमिति स्मृतम् ।
नात्र बुद्धीन्द्रियाण्येव तदभिव्यञ्जकानि तु ।। १९७ ।।

विरुद्धव्यङ्ग्यभेदेन बुद्धीन्द्रियबहुत्ववत् ।
नेष्टं यद्यात्मसामर्थ्यं गमनादिक्रियाकरम् ।। १९८ ।।

मृतदेहेऽपि कर्तृत्वं प्रसक्तं केन वार्यते ।
कर्तृत्वमप्यणोरेव न जडस्य घटे यथा ।। १९९ ।।

न चित्संनिधिमात्रेण कर्तृत्वं जडवस्तुनः ।
कुम्भादेश्चाविशेषेण कर्तृत्वं संनिधेस्तदा[1] ।। २०० ।।

ज्ञानक्रिया तु शक्तिर्या सा पुद्गलसमाश्रिता ।
सैव संलक्ष्यते शक्तिर्बुद्धिकर्मेन्द्रियात्मकैः ।। २०१ ।।

अनेककालसंरुद्धमात्मानं तमसोषितम् ।
विवेकात् कुर्वतेऽर्थज्ञं तदिन्द्रियफलं द्विजाः ।। २०२ ।।

मनोऽवधानसंयुक्तश्चिच्छक्त्युपकृतः पुमान् ।
आलोचयति बाह्यार्थं करणैश्चक्षुरादिभिः ।। २०३ ।।

तदा संजायते ज्ञानं विकल्पविधुरं पुरा ।
एवमालोचिते ह्यर्थे विकल्पः स्यादनन्तरम् ।। २०४ ।।

बहुष्वालोचिते[2]ष्वेकं पदार्थविषयीकृतम् ।
[3]आलोचकस्य मनसो विकल्पः परिपठ्यते ।। २०५ ।।

नो चेद् युगपदुत्पत्तिर्ज्ञानानां केन वार्यते ।
आलोचनत्वं व्यापारश्चक्षुरादेश्च केवलः ।। २०६ ।।

---

1 °स्तथा Pr. 2 °ष्वेकंपदा° Pr. 3 आलोचितस्य Pr.

केवले कल्पितेऽर्थेऽस्मिन् संकल्पो मनसा भवेत् ।
स च पूर्वानुभूत्यानुगुण्याद्धर्मविनिश्चयः ।। २०७ ।।

अमी धर्मा घटस्यैव नान्यस्येत्यनुसंस्मृतिः ।
मनसा स्वीकृतार्थस्य येन ग्राहकसङ्गतिः ।। २०८ ।।

अहंकारः समुद्दिष्टः सोऽभिमानात्मको मनः ।
स नो चेद् ग्राहको नात्मा तस्यान्यैश्चाविशेषतः ।। २०९ ।।

अहंकृदन्त[1]र्भोगोऽतः सर्वत्रापि प्रवर्तते ।
बुद्धिः प्रवर्तते पश्चाद् विषयाध्यवसायिनी ।। २१० ।।

मनःसंकल्पितैरेकनिष्ठत्वेनानुरोधतः ।
विषयाध्यवसायात्मा बुद्धिरेवैष केवलः ।। २११ ।।

काकाक्षिवन्मनश्चारो बहिरन्तःप्रवर्तनात् ।
मनः स्वीकृत एवार्थे बुद्ध्यहंकारयोर्गतिः ।। २१२ ।।

आलोचनादिबुद्ध्यन्तैः करणैरर्थनिश्चयः ।

ऋषयः—

यद्यज्ज्ञानं भवेत् सर्वं मनश्चिच्छक्तिसंभवम् ।। २१३ ।।

तत्सर्वं बौद्धमेवेष्टं विनाशित्वेन हेतुना ।

ईश्वरः—

तन्न बुद्धेर्जडत्वेन ज्ञानोत्पादकता कुतः ।। २१४ ।।

अभिव्यञ्जकसंबन्धात् कादाचित्कतया चितः ।
क्षणिकत्वं तु नित्याया [2]अपि सद्योऽनुभूयते ।। २१५ ।।

यावद् दीपः स्थितस्तावत् पदार्थानां प्रकाशकः[3] ।
अभिव्यञ्जकहेतूनां संतत्यैव प्रवृत्तितः ।। २१६ ।।

---

[1] °न्तभोगार्थः Pr. [2] अभिसंद्यो Pr. [3] °शकम् Pr.

धारावाहिकधीश्चापि क्षणिकैवानुभूयते ।
अत एव हि भावानां क्षणिकत्वेन संविदः ।। २१७ ।।

क्षणिकत्वं ब्रुवाणानामाशापीडा निवारिता ।

ऋषयः—

सत्त्वेन क्षणिकाभा वा नेष्यन्ते किमितीश्वर ।। २१८ ।।

अर्थक्रियाकारिता हि सत्ता सा क्षणिकेषु च ।
क्रमाक्रमविभागाभ्यां स्थिरेषु तदयोगतः ।। २१९ ।।

विलम्बकारणायोगात् तथा स्थैर्यक्षतेरपि ।
अलं स्वतोऽसमर्थस्य सहकारिशतैरपि ।। २२० ।।

अर्थक्रियाकरत्वेन क्षणिकत्वमवस्थितम् ।

ईश्वरः—

क्षणिकत्वे पदार्थानां कार्यकारणताक्षतिः ।। २२१ ।।

[1]कार्यकारणरूपेण भवेत् कारणतां व्रजेत् ।
वर्तमानोऽघटत्वेन मृत्पिण्डः कुम्भतां व्रजेत् ।। २२२ ।।

अतः क्षणद्वयस्थायि कार्योत्पत्तौ तु कारणम् ।
तयोरर्थान्तरत्वेन तदुत्पत्तौ तु[2] कारणम् ।। २२३ ।।

अन्यथा समकालोऽपि भावः कस्मान्न कारणम् ।
द्वयोरर्थान्तरत्वेन कालभेदः कथं तयोः ।। २२४ ।।

[3]कारणस्य कुतस्त्यो वा विशेषः सहकारितः ।
कुतो वा घटनिष्पत्तिस्तन्तुभ्यो न भवेद् द्विजाः ।। २२५ ।।

कार्यकारणभावोऽतः स्थिरेष्वेव व्यवस्थितः ।
अर्थक्रियाकरत्वं च स्थायिनां क्रमशः स्थितम् ।। २२६ ।।

---

[1] कार्यं करण° Pr. [2] न Pr. [3] करणस्य Pr तस्यैव विशेष° Pr.

समर्थस्य सदा कार्य[1]करत्वनियमो न च ।
अग्निर्दाहसमर्थोऽपि स्फोटोऽङ्गुलिमपेक्षते ।। २२७ ।।

क्रमाक्रम[2]विभागाभ्यां दुराशा क्षणिकत्वधीः ।
किंच प्रागनुभूता या धीः सेयमुपजायते ।। २२८ ।।

क्षणिकत्वे[3] कुतस्तस्याः प्रत्यभिज्ञा हि[4] जायते ।
क्षणिकत्वं पदार्थाना[5]मथवास्तु जडात्मनाम् ।। २२९ ।।

कारणत्रयमात्रं यत् सर्व[6]कार्येष्वपेक्षते ।
बिन्द्वादयोऽपि ये भावाः समानपरिणामिनः ।। २३० ।।

ज्ञानमेव स्थिरं नित्यं जडवर्गस्य दीपकम् ।
तस्य क्षणिकता ज्ञेया वस्तूनां क्षणिकत्वतः ।। २३१ ।।

ऋषयः—

सत्सु बाह्येषु भावेषु धियः स्थैर्यं भवेदपि ।
असत्सूपाध्यभेदेन धियः क्षणिकता स्वतः ।। २३२ ।।

बुद्धिरेव हि बाह्यार्थरूपेण प्रतिभासते ।
भेदोपलम्भाभावाच्च सहैव प्रतिभासनात् ।। २३३ ।।

विषयत्वं च न ज्ञानाद् युज्यतेऽर्थान्तरस्य तु ।
अर्थान्तरत्वे तज्ज्ञानं कथं तस्य भवेदिह ।। २३४ ।।

[7]यदन्यस्य स्वरूपं तु कथमन्यस्य संभवेत् ।
न हि कुम्भगतं रूपं भवेद्रूपं पटस्य च ।। २३५ ।।

[8]ततः संविदि यद्रूपं संविदो रूपमेव च ।
न संविद्रूपयोर्भेदो विषयज्ञानयोर्वद ।। २३६ ।।

---

[1] °षकरत्वेनिय° Pr. [2] विकल्पाभ्यां Pr. [3] °णिकत्वं Pr.
[4] न Pr. [5] °नां यथा वस्तु Pr. [6] °कार्येषु कल्पते Pr.
[7] यदन्यस्व° Pr. [8] तत् Pr.

ईश्वरः—

तदसत् संविदर्थेन भिद्यते न तथापि सः ।
तद्भेदको न चेदर्थः संविद्भेदः कथं भवेत् ।। २३७ ।।

भवेन्न हि स्वतो भेदो एकस्या घटसंविदः ।
भेदानन्त्यप्रसङ्गेन भेदकोऽर्थो धियो मतः ।। २३८ ।।

किंचैकस्य पदार्थस्य नानारूपपरिग्रहः ।
उपाधिमन्तरा न स्यात् संविदः स्फटिकस्य[1] वा ।। २३९ ।।

ततोऽर्थक्षणिकत्वेन क्षणिकत्वं च संविदः ।
प्रसङ्गानुप्रसङ्गेन बौद्धो वादोऽपि वर्णितः ।। २४० ।।

तन्मात्राण्यपि वर्ण्यन्ते [2]क्रमप्राप्तानि संप्रति ।
बाह्येन्द्रियपरिच्छेद्यगुणत्वाद् भूतसंहतिः[3] ।। २४१ ।।

प्रत्यक्षत्वेऽस्मदादीनां स्थिता कारणपूर्विका ।
यत्तत्र कारणं विप्राः सा तु तन्मात्रसंहतिः ।। २४२ ।।

विशेषवत्वाच्छब्दादेस्ते च सामान्यपूर्वकाः[4] ।
यत्तत्रापि च सामान्यं तन्मात्रमिति भावयेत् ।। २४३ ।।

एकद्वित्रिचतुष्पञ्च गुणास्तन्मात्रसंहतिः ।
अत एव हि भूतानामभियोगो गुणैः क्रमात् ।। २४४ ।।

स्थौल्यसौक्ष्म्यकृतो भेदो भूततन्मात्रयोरिह[5] ।
शब्दादिमात्रं तन्मात्रमित्युक्तं चेन्निराश्रयम् ।। २४५ ।।

शब्दादीनां गुणत्वेन कुतोऽस्य गुणिहेतुता ।
न गुणी कश्चिदर्थोऽस्ति जडो गुणसमाश्रयः ।। २४६ ।।

---

1 °कस्यवत् Pr. 2 क्रमात् प्रा° Pr. 3 संप्रति Pr.
4 °न्यपूर्वि Pr. 5 °रिव Pr.

गुणा एवानुभूयन्ते गुणिसंज्ञाश्च सङ्गताः
विश्वं गुणात्मकं शान्तघोरमूढात्मकं यतः ।। २४७ ।।

तथा प्रवृत्तिनियमप्रकाशार्थत्वहेतुना ।
मोहदुःखसुखात्मत्वादपि नार्थान्तरं ततः ।। २४८ ।।

ऋषयः——

दर्शनस्पर्शनाभ्यां तु नन्वेको विषयीकृतः ।[1]
[2]पदार्थस्तत्कथं न स्याद् गुणी कश्चित्ततोऽपरः ।। २४९ ।।

ईश्वरः——

तदसच्चक्षुरादीनां रूपादिग्रहणं स्थितम् ।
तत्कथं तैस्ततोऽन्यस्य वस्तुतो युज्यते ग्रहः ।। २५० ।।

इन्द्रियग्राहकं वस्तु गुणयोरिति चेन्मतिः ।
तन्न रूपैकनिष्ठत्वाच्चक्षुस्तैजसमिन्द्रियम् ।। २५१ ।।

इत्यादि वदतश्चक्षुरध्यात्मं हि प्रसज्यते ।
यद्वा भवतु तद् द्रव्यं प्रकाशादि क्रिया[3]परम् ।। २५२ ।।

यदि स्यान्न गुणेभ्योऽन्यः नो चेत् तद्वस्तु कीदृशम् ।
वैचित्र्यात्[4] परिणामस्य गुणा एव [5]गुणो गुणी ।। २५३ ।।

ऋषयः——

शब्दादिगुणवन्तीह तन्मात्राण्युदितानि हि ।
किं ते शब्दादयो भिन्नाः स्वाश्रयेभ्यो न वा वद ।। २५४ ।।

ईश्वरः——

तत्तद्[6]गुणविभागस्तु क्रमात् तन्मात्रपञ्चकम् ।
शब्दादेरविभागो यो गन्धतन्मात्रमीरितम् ।। २५५ ।।

---

1 °यीस्थितः Pr. 2 पदार्थत्वात् Pr. 3 °त्मकम् Pr.
4 परिमाणस्य Pr. 5 गुणे Pr. 6 °गुणवि° Pr.

रसान्तस्या विभागोऽन्यद्रूपं तस्यान्यदिष्यते ।
[1]स्पर्शान्तस्यापरं तीव्रशब्दादेः शब्दमात्रकम् ।। २५६ ।।

अनेन हि प्रकारेण गुणसङ्गः समीरितः ।
आश्रयाश्रयि[2]भावोऽतस्तन्मात्रगुणयोर्न च ।। २५७ ।।

ऋषयः—

पृथ्व्यादिकारणत्वेन प्रोक्ता तन्मात्रसंहतिः ।
परिमाणविवक्षातः परमाणोः कथं न वा ।। २५८ ।।

ईश्वरः—

कारणं जगतो नाणुरविभुत्वाद् घटादिवत् ।
सति मृत्त्वे यवीयान् यः पार्थिवः स घटो यथा ।। २५९ ।।

यवीयान् परमाणुश्च तस्माद् भौतिक इष्यताम् ।
ये मूर्ता ये च [3]विश्लिष्टा मूर्तात् कुम्भादिवस्तुनः ।। २६० ।।

ते कार्याण्येव दृश्यन्ते ग्रीवाद्यवयवा यथा ।
किंचाणवः सावयवाः परेषां [4]स्थित्यदर्शनात् ।। २६१ ।।

न हि धर्मस्थितिर्दृष्टादृष्टे धर्मिणि कुत्रचित् ।
तन्नावयवमात्राणोर्न हि युक्ता कदाचन ।। २६२ ।।

स्थितिर्वा परमाणूनां सूक्ष्मावयवयोगिता ।
साधयेत् तादृशानां तु कार्यत्वे घटवत् स्थितम् ।। २६३ ।।

ऋषयः—

ननु धर्मिपरिच्छेदमानेन परमाणवः ।
विगतावयवा एता तत्कथं कथ्यतेऽन्यथा ।। २६४ ।।

---

[1] स्पर्शं तस्वा° Pr. [2] भागोऽपि Pr. [3] विशिष्टा Pr.
[4] स्थिति° Pr.

ईश्वरः—

तन्न पूर्वादिदिग्भागैः संयोगाद् देशभेदतः ।
सांशत्वं परमाणूनां प्रसक्तं केन वार्यते ।। २६५ ।।

एकस्मिन्नेव देशे चेत् संयोगोऽस्तु [1]तदा तदा ।
न हि स्वतो दिशां भेदो भेदकोपाधिमन्तरा ।। २६६ ।।

किंच कार्यसमुत्पत्तिर्निरंशत्वेन युज्यते ।
संयुक्तदेशादधिको देशस्तेषां न यद् भवेत् ।। २६७ ।।

ऋषयः—

नन्व[2]मूर्ता हि तन्मात्रा कुतोऽस्या मूर्तहेतुना ।
ततो मूर्तपृथिव्यादि स्वानुरूपं स्वकारणम् ।। २६८ ।।

अनुमापयतीत्यत्र मूर्तास्ते हेतवोऽणवः ।

ईश्वरः—

तदसन्मूर्तिमत्कार्यं यथा कुम्भपटा[3]दिकम् ।। २६९ ।।

एते च मूर्तिमत्त्वेन कार्यापेक्षप्रतिष्ठिताः ।[4]
अमूर्ताश्चेद् विवादोऽयं नामन्येव कृतो भवेत् ।। २७० ।।

माया तु परमामूर्ता नित्यानित्यस्य कारणम् ।
एकानेकविभागाढ्या[5] वस्तुरूपाशिवात्मिका ।। २७१ ।।

ऋषयः—

[6]नन्वमूर्ततया तस्या मूर्ताकारणता कुतः ।
मूर्तमेव हि मूर्तस्य कारणं परिदृश्यते ।। २७२ ।।

---

[1] तदातुवा Pr. [2] °न्वमूर्तं Pr. [3] घटादिवत् Pr. [4] °ष्टिता Pr.
[5] °गाभ्यां Pr. [6] नन्वमूर्तं Pr.

ईश्वरः—

तन्न सावयवानां तु हेतुत्वपरिदर्शनात् ।
तत्पक्षे परमाणूनां सांशत्वं केन वार्यते ।। २७३ ।।

सभागत्वमहेतुश्चेन्मूर्तत्वं च तथेष्यते ।
भागवत्वं पदार्थानां व्याप्तं कार्यतयेति चेत् ।। २७४ ।।

मूर्तत्वं च तथा व्याप्तं नाधिकचमुभयत्र च ।
परमाणोर्निरंशत्वममूर्तान्न[1] विशिष्यते ।। २७५ ।।

तथाविधाणवो लोके नेष्यन्ते तत्त्ववेदिभिः ।
किंचानेकत्वमेतेषां सभागत्वं च साधयेत् ।। २७६ ।।

अनेकं यज्जडं वस्तु वस्त्वसत्तद् घटादिवत् ।
तस्मादमूर्तमेकं यत् तदनेकस्य कारणम् ।। २७७ ।।

अनित्यमाश्रितं सांशमनेकं कार्यमिष्यते ।
विपरीतमतो हेतुरित्युक्तं शिवदर्शने ।। २७८ ।।

ततो न परमाणूनां हेतुत्वं युक्तिभिर्मतम् ।
महाभूतानि जायन्ते क्रमात् तन्मात्रपञ्चकात् ।। २७९ ।।

[2]आकाशं पवनस्तेजस्तोयं भूरिति संज्ञया ।
गमागमादिव्यापारो यस्मिन् सति नृणां भवेत् ।। २८० ।।

तद्धेतुभूतमाकाशमिष्यतां मुनिपुंगवाः ।
नो चेत् तदवकाशाख्यं विचरेयुः [3]क्व जन्तवः ।। २८१ ।।

न हि भूम्यन्तरा दृष्टौ प्राणिनां तु गमागमौ ।
यस्मादाकाशमेष्टव्यमवकाशस्य कारणम् ।। २८२ ।।

किंच तीव्रादयः शब्दाः गुण्यपेक्षा गुणत्वतः ।
गुणी चाकाशमित्युक्तं तच्च नृणामतीन्द्रियम् ।। २८३ ।।

---

[1] न हि विद्यते Pr. [2] °जं तेजोतोयं Pr. [3] क्वचरेयुः Pr.

ऋषयः—

ननु प्रत्यक्षमाकाशमुत्पत[1]द्योगदर्शनात् ।
अनक्षं चेन्न [2]दृश्येत [3]पक्षिणो दिवि यद्गतिः ।। २८४ ।।

ईश्वरः—

[4]एवं चेन्मूर्तमाकाशं स्पर्शादिगुणयोगतः ।
इत्यादि[5] गुणतः पृथ्वी साधर्म्येणातिशोभते ।। २८५ ।।

अन्यस्य कार्येणान्यस्य स्वरूपपरिनिश्चये ।
आलोकेन हि संयोगे संयोगो दृश्यते तयोः ।। २८६ ।।

नीलं व्योमेति तन्मिथ्या दूरत्वादिनिबन्धनात् ।
व्योमानक्षं दविष्ठत्वाद् यथा तन्मात्रसंहतिः ।। २८७ ।।

ऋषयः—

व्योमाह्वयः कृतः कश्चिद् भावो नास्त्यवकाशकः ।[6]
अवकाशस्तु पृथ्व्यादेरभावात्मक एव सः ।। २८८ ।।

इत्याहुरपरे तत्र समाधानं विधीयताम् ।[7]

ईश्वरः—

अभावो भावधर्मस्तु तथाभावोऽपि तद्गतः ।
यद्यभावो न तद्धर्मः सदाभावः पटस्य च ।। २८९ ।।

अभावोऽयं पदार्थस्य धर्मश्चेच्छशशृङ्गवत् ।
सर्वदानुपलम्भः स्यादिति चेत् तदचोदनम्[8] ।। २९० ।।

अभावोऽनुपलब्धिर्हि सा च कार्यसमाश्रिता ।
तद्धेतोः कार्यभूता सा तामसोद्रेकतः स्थिता ।। २९१ ।।

---

[1] मुत्वा तद्योग° Pr. [2] दृश्यन्ते Pr. [3] पक्षिणि Pr.
[4] मूर्तमाकाशमेवं Pr. [5] वदतः Pr. [6] °काशतः Pr.
[7] अस्यार्धश्लोकस्य मूले पाठो न दृश्यते अपितु भाष्ये अस्यार्थो दृश्यते ।
[8] °दचोदितम् Pr.

अभावः शक्त्यवस्थातो भावः कार्यात्मना स्थितिः ।
भावाभावौ न चैकत्र भावानां ते न संमतौ ।। २९२ ।।

मूर्ताभावोऽप्यभावत्वान्मूर्तेष्वेव व्यवस्थितः ।
तत्कथं तदभावोऽयमवकाशो भवेदिह ।। २९३ ।।

यो [1]यस्य धर्मस्तस्येह युक्ता तद्धर्मिणि स्थितिः ।
[2]अवकाशः पुनः सोऽयं व्यापी सर्वत्र दृश्यते ।। २९४ ।।

मूर्ताभावोऽवकाशोऽयमिति पक्षे निरूप्यताम् ।
न तावत् प्रागभावोऽयं भावोत्पत्तेरनन्तरम् ।। २९५ ।।

तस्य नाशेऽवकाशस्य नाशाद् भावस्थितिः क्व वै ।
अवकाशं विना क्वापि भावानां दृश्यते स्थितिः ।। २९६ ।।

न चेतरेतराभावो मूर्तस्यापि प्रसङ्गतः ।
न च प्रध्वंससंज्ञोऽयं प्रागवस्थित्ययोगतः ।। २९७ ।।

क्वापि स्थितानां भावानां प्रध्वंसश्चोपपद्यते ।
ततः प्रागेव संसिद्धमाकाशं हि द्विजर्षभाः ।। २९८ ।।

तच्च शब्दगुणं ज्ञेयं स्वकार्यस्य गुणान्वयात् ।

ऋषयः——

तीव्रादिधर्मोपेतत्वाच्छब्दो द्रव्यं न किं भवेत् ।। २९९ ।।

अयावद्द्रव्यभावित्वाद् व्यक्तेरन्यत्र चाश्रयात् ।

ईश्वरः——

तन्नानैकान्तिको हेतुर्गन्धादेश्च तथात्वतः ।। ३०० ।।

गन्धादिरपि तीव्रादिर्दृष्टोऽथापि गुणः स्मृतः ।
गुणान्तरेऽपि तुल्यः स्यादयावद्द्रव्यभाविता ।। ३०१ ।।

---

[1] यत्र Pr. [2] अवकाशं Pr.

वारिस्थतेजसो रूपं न किंचिदुपलभ्यते ।
अभिव्यञ्जकसंयोगात् कादाचित्कतयाथवा ।। ३०२ ।।

व्यक्तिश्चान्यत्र संतत्यातीतस्य च पुनर्ध्वनेः ।
ततश्च गुण एवेष्टो गुणी व्योमाह्वयस्य तु ।। ३०३ ।।

गुणानां संहतिर्द्रव्यं विश्लेषो गुणसंज्ञितः ।
नावकाशाद् दिशां भेदस्तथैव व्यवहारतः ।। ३०४ ।।

ऋषयः—

नन्वाकाशगुणः शब्दः कथ्यते कथमीश्वर ।
पुरा बैन्दव एवोक्तो वैखर्यादिविभेदतः ।। ३०५ ।।

ईश्वरः—

सत्यं ध्वन्यात्मकः कश्चिद् ध्वनिर्वर्णात्मको मतः ।
आकाशाज्जायमानोऽसौ ध्वनिरूपः स केवलः ।। ३०६ ।।

नोपादानं तु वर्णानां[1] बैन्दवोऽवर्णकारणम् ।
व्योमातीततया वर्णाः न व्योमध्वनिसंभवाः[2] ।। ३०७ ।।

यद्यस्मादतिरिक्तं तन्न तत्कारणकं यथा ।
पृथ्वीन्द्रियादिभावानां तस्मादुक्तप्रसङ्गतः ।। ३०८ ।।

व्योमातीता हि ते वर्णाः शुद्धाध्वादौ व्यवस्थिताः ।
तदभिव्यञ्जकं व्योमव्यङ्ग्या वर्णा व्यवस्थिताः ।। ३०९ ।।

वर्णानामविभागो यो नादः सोऽर्थस्य वाचकः ।
अकारादिक्षकारान्ता वर्णाः पञ्चाशदेव तु ।। ३१० ।।

तैरेव खचितं वाक्यं पदभावेन लक्षितम् ।
वर्णैरेव तु वाक्यार्थो न च वाक्याह्वयादपि ।। ३११ ।।

---

[1] बैन्दवो वर्ण° Pr. [2] संभवः Pr.

क्रमेणैव स्थितिस्तेषां क्रमेणैवार्थवेदनात्[1] ।
न वर्णव्यतिरेकेण श्रवणं पदवाक्ययोः ।। ३१२ ।।

आस्ते चेदुपलभ्येत ककाराकारबाह्यतः ।
उच्चारानन्तरं ध्वस्ताः पौर्वापर्यक्रमात् स्थिताः ।। ३१३ ।।

अन्योन्यमपि ते दृष्टा वर्णा नार्थस्य वाचकाः ।
वर्णेभ्यो ह्यविशिष्टत्वान्न पदं वाक्यमेव च ।। ३१४ ।।

ततो वर्णैरभिव्यक्तो नादः स्यादर्थवाचकः ।
पदात्मा जायते नादो वर्णैरेव पदस्थितेः ।। ३१५ ।।

वाक्यात्मकस्तदङ्गेभ्यः पदेभ्य उपजायते ।
पूर्ववर्णोत्थसंस्कारः संस्कृतोऽर्णस्तु पश्चिमः ।। ३१६ ।।

अर्थानां वाचको भूयादिति चेत् तन्न शोभते ।
यथा वर्णाः पुरा ज्ञाता क्रमेणैव तथा पुनः ।। ३१७ ।।

समावहन्ति संस्कारांस्ते तथा स्मृतिबोधकाः ।
विशेषाधानसामर्थ्यायोगादनुभवस्य च ।। ३१८ ।।

न तेभ्योऽर्थे मतिः काचिद् युगपत् स्थित्ययोगतः ।
ततः स्थूलैस्तथा वर्णैर्व्यक्तो नादस्तु वाचकः ।। ३१९ ।।

किंचार्थबोधका वर्णाः दृश्यन्ते क्वचिदेव तु ।
क्वचिदन्तःस्फुरन्नादो बोधको न स दैवते ।। ३२० ।।

अश्रोत्रविषयत्वेन नादो नार्थस्य वाचकः ।

ऋषयः——

ननु वर्णैः क्रमान्नादो व्यज्यतेऽक्रमतोऽथवा ।। ३२१ ।।

---

[1] °वेदना Pr.

क्रमाच्चेदर्थ एवास्तु वर्णैः किं कल्पितान्तरात् ।

ईश्वरः—

तन्नार्थवाचका वर्णा व्यञ्जका न कदाचन ।। ३२२ ।।

नादस्तु व्यज्यते वर्णैः कथं स्यात् समदूषणम् ।

चक्रादयो घटोत्पत्तौ व्याप्रियन्ते क्रमेण च ।। ३२३ ।।

एवं वर्णाः क्रमस्थाश्च नादस्य व्यञ्जका मता ।

घटव्यक्तौ च चोद्योऽयं समानत्वान्न दूषणम् ।। ३२४ ।।

ऋषयः—

ननु ज्ञातोऽयमर्थस्य वाचकोऽज्ञात एव वा ।

अज्ञातश्चेदशेषोऽपि स्यादशेषार्थवाचकः ।। ३२५ ।।

ज्ञातश्चेत् तेन संबन्धाग्रहणात् पूर्ववद् भवेत् ।

ईश्वरः—

तदसद् व्यवधानेन वर्णानां हेतुभावतः ।। ३२६ ।।

नादस्तु कल्प्यते येन क्रमेणार्थे मतिर्भवेत् ।

संबन्धग्रहणादिस्तु वर्णैरेव व्यवस्थितः ।। ३२७ ।।

स्याद्वाचकोऽश्रुतोऽप्येव यक्तस्तद्धेतुभावतः ।

कार्येष्वपि च हेतुत्वं कारणस्यैव युज्यते ।। ३२८ ।।

सर्वेषामपि भावानां शक्तिः कारणमुच्यते ।

यन्मूलकारणं तत्तु शक्त्यनीकसमाकुलम् ।। ३२९ ।।

तत्कार्याणामनेकेषां पृथक्च्छक्त्या फलं भवेत् ।

अन्यथा निम्बबीजाच्च पारिजातः समुद्भवेत् ।। ३३० ।।

अत्यर्थं सा च भिन्नैव कार्यभेदेन गम्यते ।

नन्वर्थव्यतिरेकेण शक्तिर्नैवोपलभ्यते ।। ३३१ ।।

सत्यं न गृह्यतां शक्तिरर्थापत्त्या तु कल्प्यते ।

प्रथमं स्फोटकृद् वह्निः सहसाङ्गुलिसङ्गमे ।। ३३२ ।।

स एव मन्त्रसामर्थ्यात् स्फोटोत्पादाय नेष्यते ।
निवार्यमाणः स्फोटोऽयं कारणान्तरकल्पकः ।। ३३३ ।।

यत् तत्र कारणं शक्तिर्गृह्यतां वह्निमन्तरा ।
मन्त्राभावविशिष्टोऽग्निर्हेतुश्चेत् स्फोटजन्मनि ।। ३३४ ।।

प्रतिमन्त्रप्रयोगेऽपि नैव जायेत सोऽङ्गुलेः ।
सति प्रथममन्त्रेऽपि स्फोटकार्यं प्रजायते ।। ३३५ ।।

तर्हि द्वितीयमन्त्रस्य सद्भावोऽप्यस्तु कारणम् ।
सति प्रथममन्त्रे तु द्वितीयेनाणुनाधुना ।। ३३६ ।।

क्रियते किं किमाद्यस्य मन्त्रस्य प्रतिबन्धनम् ।
तत्कार्यस्य विनाशस्तत्प्रागभावविधिस्तु वा ।। ३३७ ।।

स्वसत्तयोपकारो वा क्रियते परिचिन्त्यते ।
न तावत् प्रतिबन्धोऽपि प्रागभावविधिस्तथा ।। ३३८ ।।

मन्त्रस्य क्रियते तस्य स्वरूपेण व्यवस्थितेः ।
स्वसत्तयोपकारित्वमपि नैवाप्रदर्शनात् ।। ३३९ ।।

सामग्र्यन्तर्गतं यत्तत् किंचित् कृत्वोपकारकम् ।
दृश्यते तेन हेतुत्वं नास्त्यकिंचित्करस्य च ।। ३४० ।।

किंतु सत्त्वोपकारित्वे सर्वदा स्यादवस्थितिः ।
द्वितीयस्य कुतः पूर्वमन्त्र एव समीक्ष्यते ।। ३४१ ।।

कुतो वा नेष्यते पूर्वमन्त्रे त्वसति पश्चिमः ।
ततश्चाद्यमनोः कार्यविरोधिव्याप्तिभावतः ।। ३४२ ।।

विरोधित्वं च कार्यस्य प्रतिबन्धो न चेतरत् ।
न तु कारणवैकल्यं विना कार्यं न जायते ।। ३४३ ।।

नाग्न्यङ्गुल्योर्हि वैकल्यं विकला शक्तिरेव सा ।
नाद्यमन्त्रस्य सत्ताया बाधो युक्तो द्वितीयतः ।। ३४४ ।।

घटादेरपि सत्ताया बाधकत्वप्रसङ्गतः ।
ततः शक्तिरशेषार्थवर्तनी गम्यतामिति ।। ३४५ ।।

शब्दस्फोटप्रसङ्गेन भावस्फोटोऽपि निश्चितः ।
वाय्वादीनां समुत्पत्तिः क्रमेणैवाभिधीयते ।। ३४६ ।।

वायुरग्निस्तथा तोयं पृथ्वीत्येतच्चतुष्टयम् ।
अनिलःस्पर्शतन्मात्रादभवद् व्यूहनात्मकः ।। ३४७ ।।

उत्क्षेपणादिव्यापारहेतुत्वेनोपकारकः ।
दशधा वर्तमानोऽन्तः शरीरे सर्वजन्तुषु ।। ३४८ ।।

प्राणापानसमानादिव्यानोदानादिसंज्ञया ।
अनलो रूपत[1]न्मात्राज्जायते [2]पक्तिलक्षणः ।। ३४९ ।।

स च त्रेधा स्थितो लोके गार्हपत्त्यादिसंज्ञया
अतोऽन्य एव शैवाग्निस्ततो बिन्दूदरान्तरे ।। ३५० ।।

[3]यद्यदश्नाति लोकोऽयं तदनेनैव पच्यते ।
अतोऽयमनलोऽत्यन्तं प्राणिनामुपकारकः ।। ३५१ ।।

अभवद्रसतन्मात्रात् तोयं संग्रहणक्रियम् ।
तोयेनैव प्रतिष्ठास्य स्थिता लोकस्य वस्तुनः ।। ३५२ ।।

स्वतो धूल्यात्मकत्वेन पृथ्वी चानेन वै दृढा ।
पृथिवीगन्धतन्मात्रादभवद् धारणक्रिया ।। ३५३ ।।

नाकाशाज्जायते वायुर्न वायोरग्निसंभवः ।
नाग्नेरापस्ततः पृथ्वी धर्मातिशयदर्शनात् ।। ३५४ ।।

कारणाद् गुणसंक्रान्तिर्युक्ता कार्येषु न स्वतः ।
व्योम्नः पञ्चगुणत्वं स्यात् तथा सृष्टिक्रमो यदि ।। ३५५ ।।

---

[1] °न्मात्रं Pr. [2] पक्वलक्षणः Pr. [3] यदश्नात्ययं Pr.

[1]तन्मात्रपञ्चकाज्जातं ततो व्योमादिपञ्चकम् ।। ३५५-।।

इति श्रीमत्पौष्करागमे

ज्ञानपादे पुंस्त्वपटलः षष्ठः

— ० —

सप्तमः पटलः

— ० —

ऋषयः—

भगवन् देवदेवेश भक्तानुग्रहकारक ।
पदार्थाः षट् समुद्दिष्टाः कृपयानेकयुक्तिभिः ।। १ ।।

अधुना श्रोतुमिच्छामः प्रमाणानि कृपानिधे ।
यत्स्वरूपमविज्ञाय प्रमेयो व्यर्थ इष्यते ।। २ ।।

तस्मादस्माकमीशान तानि वक्तुमिहार्हसि ।

ईश्वरः—

शृणुध्वमथ मानानि श्रोतुं कौतूहलं यदि ।। ३ ।।

चत्वारि तानि नामानि प्रत्यक्षादीनि हे द्विजाः ।
प्रत्यक्षमनुमानं च शब्दोऽर्थापत्तिरेव च ।। ४ ।।

संशयादिविनिर्मुक्ता चिच्छक्तिर्मानमुच्यते[2] ।
द्व्यालम्बा संशयो बुद्धिः समानाकारदर्शनात् ।। ५ ।।

विपर्ययोऽन्यथा ज्ञानमतद्रूपप्रतिष्ठितम् ।
अनुभूतार्थविषया मतिः स्मृतिरिहोच्यते ।। ६ ।।

एभिर्विहीना चिच्छक्तिः प्रमाणत्वेन संमता ।
चिच्छक्तिश्च परापेक्षो[3] बोध एव न चापरः ।। ७ ।।

---

[1] तन्मात्र° इति श्लोकानन्तरम्—वक्तव्यं ते मुनिव्याघ्र पुरस्तात् सुविचार्य तु इत्ययं पाठो मुद्रितकोशे दृश्यते । [2] मान उच्यते Pr. [3] पेक्षा Pr.

न तस्याभिमुखं ज्ञानं माता मानं परोन्मुखम् ।
परे प्रमेय[1]भावादिर्व्यापारः फलमिष्यते ।। ८ ।।

अत्राव्याप्त्यादिदोषाणां न कदाचन संभवः ।
प्रत्यक्षादिप्रमाणेषु व्याप्त्या *नाव्याप्तिदूषणम् ।। ९ ।।

नातिव्याप्तिश्च मेयेषु* मानाभावेषु वर्तनात् ।
[2]नान्यथाव्याप्तिरप्यस्ति प्रमाणं [3]चेत् तदीदृशम् ।। १० ।।

प्रमाणकथनं तेन समीचीनमुदाहृतम् ।
ननु न स्यात् कुतो मानं यत्तत् प्रमितिसाधनम् ।। ११ ।।

[4]सत्वादीनां दृगादीनां प्रमाणत्वप्रसङ्गतः ।
यत् प्रमाणं न तन्मेयं मेयाभावः पुनः स्थितः ।। १२ ।।

[5]मित्यानुमीयते तत्र [6]शब्दादिर्विषयत्वतः ।
यन्मेयं न हि तन्मानं यतो मानेन मीयते ।। १३ ।।

पश्यामीति दृशा लोके प्रसिद्धिरुपकारतः ।
न कस्यापि पदार्थस्य यद्विना भवति प्रमा ।। १४ ।।

तदेव मानमेष्टव्यं चक्षुरादि न तादृशम् ।
न चक्षुः शब्दसंवित्तौ न श्रोत्रं रूपवेदने ।। १५ ।।

सर्वत्र ग्राहिणी संवित् सैव मानमतो मतम् ।
[7]यत् सिद्धाविदमः सिद्धिर्यदसिद्धौ न किंचन ।। १६ ।।

बुद्धिः सर्वान्तिमत्वेन कस्मान्मानं न चेष्यते ।
प्राकृतत्वाविशेषेण दृगादेरविशेषतः ।। १७ ।।

असंविदात्मकत्वेन नहि बुद्धेः प्रमाणता ।
बुद्धिश्च वेद्यते किंच सुखदुःखादिरूपतः ।। १८ ।।

---

[1] हानादिः Pr. [2] नान्यथा व्याप्तिदोषाणां Pr. [3] चोक्तमीदृशम् Pr. [4] नत्व° Pr. [5] मत्या° Pr. [6] शब्दादिवि° Pr. [7] यत् सिद्धौ च इयं सिद्धि° Pr. * भावेष्यवर्तनात् pr.

प्रमाणैकान्तता तेन बुद्धेरपि न संमता ।
ननु प्रमेयसंसिद्धौ सामग्री [1]केन नेष्यते ।। १९ ।।

प्रमात्रादिघटान्तेषु सत्स्वेव घटनिश्चयात् ।
तन्न प्रमातृमेयादिव्यवहारविलोपतः ।। २० ।।

मातृमानप्रमेयाणां[2] तदन्तर्भावतः स्थितेः ।
तेषां तु व्यतिरेकेण सामग्री न च दृश्यते ।। २१ ।।

यद्यतो व्यतिरिक्तं तत् ततो भिन्नं स्वरूपतः ।
संशयादिविभिन्नं तु[3] चिच्छक्तिर्मानभिष्यते ।। २२ ।।

ऋषयः——

चिच्छक्तेरर्थसंयोगादक्षमिन्द्रियमार्गतः ।
स्वयमेव हि चिच्छक्तिः पदार्थाभिमुखी न तु ।। २३ ।।

कथं तदर्थे संबन्धस्तस्याः कारणमन्तरा ।

ईश्वरः——

सत्यं मलावृतत्वेन स्वनिष्ठैव प्रतिष्ठिता ।। २४ ।।

[4]कलादिकरणव्यक्त्या युज्यतेऽर्थैर्यदा तु चित् ।[5]
तदा प्रत्यक्षमित्युक्तमक्षमर्थे प्रवर्तते ।। २५ ।।

न चेन्द्रियार्थमात्रस्य संयोगोऽध्यक्षमिष्यते ।
चित्संयोगविहीनानामकिंचित्करतावतः ।। २६ ।।

विकल्पयोगात् सा शक्तिरेका द्विविधमुच्यते ।
वस्तुस्वरूपमात्रस्य ग्रहणं निर्विकल्पकम् ।। २७ ।।

नामजात्यादिसंबन्धसहितं सविकल्पकम् ।
एतच्चेन्द्रियसापेक्षं निरपेक्षं तथैव च ।। २८ ।।

---

[1] के न नेष्यते Pr. [2] मा°नप्रमाणानाम् Pr. [3] विहीना तु Pr.
[4] करणैर्युक्ता S.P. [5] यदा क्वचित् S.P.

अन्तःकरणसापेक्षमिति त्रिविधमिष्यते ।
तत्रेन्द्रियानपेक्षं च सर्वथा त्यक्तबन्धया ।। २९ ।।

चिच्छक्त्या[1]नन्तयोगाच्च योगः[2] स्वाभाविको मतः ।
अन्यच्चेन्द्रियसापेक्षं स्याच्छादननिवृत्तये ।। ३० ।।

इन्द्रियापेक्षया शक्त्या तद्द्वारेणार्थवीक्षणम् ।
अन्तःकरणसापेक्षं बाह्येन्द्रियजयेन[3] तु ।। ३१ ।।

अन्तःकरणसापेक्षं चिच्छक्तेर्ध्येयसंगतिः ।
अक्षमात्रेण संबन्धः षड्विधोऽध्यक्षसंज्ञितः ।। ३२ ।।

घटादिद्रव्यविज्ञानं चक्षुःसंयोगमात्रतः ।
संयुक्तसमवायात्तद्गुणसामान्ययोर्मतिः ।। ३३ ।।

संयुक्तसमवेतार्थसमवायाद् गुणत्वधीः ।
शब्दस्य ग्रहणं [4]श्रोत्रसमवेततया स्थितम् ।। ३४ ।।

शब्दत्वं समवेतार्थसमवायात् प्रतीयते ।
[5]विशेषणतयाभावसमवायमतिः स्थिता[6] ।। ३५ ।।

विशेष्यत्वेन वाभावसमवायमतिः स्थिता ।
अनुमानं दृढव्याप्त्या परोक्षार्थावबोधनम् ।। ३६ ।।

तच्चेह पञ्चावयवं प्रतिज्ञाहेतुरेव च ।
दृष्टान्तोपनयावेतौ निगमश्चापि पञ्चमः ।। ३७ ।।

इष्टार्थोक्तिः प्रतिज्ञा तु हेतुस्तद्व्याप्तिमद् वचः ।
[7]दृष्टान्तो द्विविधोद्युक्तो हेतुस्तद्वत् परीक्ष्यते ।। ३८ ।।

[8]दृष्टान्तापेक्षया व्याप्तप्रस्तारोपनयो भवेत् ।
पुनःप्रतिज्ञानियमो निगमः स्यात् सहेतुकः ।। ३९ ।।

---

[1] °नन्त्य° Pr. [2] ज्ञाप्यः Pr. [3] चयेन S.P. [4] श्रोत्रं Pr.
[5] विशेषणतयाप्यर्थे विशेष्यत्वेन वा भवेत् Pr. [6] °मिति स्थितिः Pr.
[7] दृष्टान्तस्तद्विधोद्युक्तः Pr. [8] दृष्टान्तपक्षयोर्व्याप्तिः Pr.

साधनस्य स्वतः साध्येनान्वयो व्याप्तिरुच्यते ।
सा च व्याप्तिर्द्विधा ज्ञेया व्यतिरेकान्वयात्मिका ।। ४० ।।

[1]सामान्यमुखतोऽन्वेयः सोऽन्वयो व्याप्तिरुच्यते ।
साध्यसाधनयोर्व्याप्तिरभावमुखतोऽपरा ।। ४१ ।।

दृष्टं सामान्यतो दृष्टमिति तत्साधनं द्विधा ।
तत्राद्यमक्षयोग्यस्य पदार्थस्यानुमापकम् ।। ४२ ।।

अन्यत् स्वतोऽप्यदृष्टस्य पदार्थस्यानुमापकम् ।
अन्वयव्यतिरेकीति[2] केवलव्यतिरेकि च ।। ४३ ।।

केवला[3]न्वयिरूपेण क्रमेण परिलक्ष्यते ।
पक्षधर्मः [4]स्वपक्षः सन् व्यावृत्तश्च विपक्षतः ।। ४४ ।।

अबाधोऽसत्प्रतीपक्षो व्यतिरेकान्वयात्मकः ।
साध्यधर्मयुतः पक्षः सपक्षः समधर्मयुक् ।। ४५ ।।

तद्विधर्मो विपक्षः[5] स्याद् बाधो मानान्तरोद्भवः ।
[6]साध्ये द्वयोस्त्विरूपत्वं [7]तेन ज्ञानाद् विपक्षता ।। ४६ ।।

निर्विपक्षो[8]ऽन्वयी हेतुर्निःसपक्षस्तथापरः ।
साग्निर्देशः सधूमत्वादन्यो रसवती यथा ।। ४७ ।।

केनाप्यध्यासितं विश्वं कार्यं स्याद् वस्तुभावतः ।
यथा कुलाल[9]सापेक्षा मृदित्येषोऽन्वयी पुनः ।। ४८ ।।

सदेवोत्पद्यते कार्यं क्रियमाणत्वहेतुतः ।
असन्नपूर्वं क्रियते धर्मांशः शशशृङ्गवत् ।। ४९ ।।

हेतूनां दूषणान्यत्र पञ्चोक्तानि शिवागमे ।
असिद्धः प्रथमो हेतोः पक्षवृत्तेरनिश्चये ।। ५० ।।

---

1 साधर्म्यमुखतो ज्ञेया सान्वय व्याप्तिरुच्यते Pr. 2 °व्यतिरेकेति Pr.
3 °न्वयरूपेण Pr. 4 सपक्षोऽसद् Pr. 5 व्यपक्षः Pr. 6 साध्यद्वय° Pr.
7 सपक्षस्य विपक्षता Pr. 8 °न्वय° Pr. 9 सापेक्षमृदित्येवान्वयी Pr.

नित्यत्वादणवो हेतुरित्यसिद्धिः स्वरूपतः ।
विशेषणविशेष्यादेरसिद्धया [1]तत्तदात्मिका ।। ५१ ।।

वर्तमानो विरुद्धः स्याद्धेतुः पक्षविपक्षयोः ।
व्यापकोऽव्यापको देशानवच्छिन्नत्वहेतुतः ।। ५२ ।।

पक्षादिन्नितये वर्तमानोऽनैकान्तिको भवेत् ।
आत्मा नित्यः प्रमेयत्वादित्यत्रोदाहृतो द्विजाः ।। ५३ ।।

[2]साध्याप्रयोजकः पक्ष एवानध्यवसायकः ।
संतत्या वर्तते विश्वं वस्तुत्वादित्युदाहृतः ।। ५४ ।।

कालातीतस्तु [3]साध्यस्य पक्षे मानविरोधतः ।
निरुपादानकं विश्वं कार्यमागन्तुकत्वतः ।। ५५ ।।

व्याप्तेर्यथावद् विज्ञानं साधनं साध्यसिद्धये ।
पर्याप्तमसतो हेतोर्येन केनापि वर्त्मना ।। ५६ ।।

व्याप्तिभङ्गोऽनुमानस्य दूषणं प्रथमं मतम् ।
अनुष्णो वह्निरित्यादि प्रतिज्ञाते सहेतुकम् ।। ५७ ।।

पञ्चानामनुमानस्यावयवानां तु पूर्वयोः ।
वैपरीत्यं समुद्दिष्टं दृष्टान्तस्याधुनोच्यते ।। ५८ ।।

नित्य आत्मा विभुत्वेन यथाकाशमितीरिते ।
दृष्टान्तः साध्यविकलः साधने च तथा भवेत् ।। ५९ ।।

आप्तोक्तिरागमः [4]सापि परोक्षार्थैकसाधनम् ।
प्रत्यक्षेणानुमानेन [5]यदिवार्थं सुनिश्चितम्[6] ।। ६० ।।

यो वक्ति सोऽयमाप्तः स्यात् तस्मादाप्ततरः शिवः ।
सुप्रसन्नेन्द्रियग्रामः सर्वज्ञः सर्वगोचरः ।। ६१ ।।

---

[1] स्यात् तदात्मिका Pr. [2] साध्य प्रयोजका पक्ष एकः Pr. [3] पक्षस्य Pr.
[4] सोऽपि S.P. [5] नदिवार्थं Pr. [6] यदिवार्थ तु निश्चितम् Pr.

पक्षपातविनिर्मुक्तो यथार्थग्राहकः सदा ।
अव्ययः परिपूर्णश्च स्वतन्त्रः पशुपाशहा[1] ।। ६२ ।।

एकं [1]प्रमाणमेकं तद्वाकचं श्रेयोनिधिः सदा ।
सृष्टचनन्तरमेवेशः शुद्धाध्वविषयानणून् ।। ६३ ।।

स्वांशुसंस्पर्शनादेव कृत्वा दृक्क्रिययोत्कटम्[2] ।
सदाशिवोऽपि भगवान् नादरूपतया गतम् ।। ६४ ।।

षट्पदार्थमयं ज्ञान[3]मनेकच्छन्द एव च ।
पूर्वतो दशसंख्यातं शिवभेदं तथापरम् ।। ६५ ।।

रौद्रमष्टादशविधं तेभ्योऽवादीत् कृपानिधिः ।
तद्देशक्रमणान्मेरोरागतं तन्त्रसागरम् ।। ६६ ।।

तत्रेदं पौष्करं तन्त्रमर्थवादादिलोपतः ।
उद्धृत्य विप्रा युष्मभ्यं कथितं बहुयुक्तिभिः ।। ६७ ।।

स्थापयध्वमिदं भूमौ योग्येषु गुरुवर्त्मसु ।
अन्योऽपि मार्गो वेदादिः पशुपाशार्थदर्शकः ।। ६८ ।।

स्वोक्ततत्त्वावधिव्याप्तिः ब्रह्मविष्ण्वादिभिः कृतः ।
परस्मान्मोक्षमार्गस्य स्थितः स्वर्गादिभोगतः ।। ६९ ।।

ऋषयः——

निष्कलान्नाद[4]रूपात्मा ज्ञानमार्गः प्रवर्तते ।
इत्युक्तं तन्न युक्तं स्याद् वागिन्द्रियवियोगतः[5] ।। ७० ।।

ईश्वरः——

वागिन्द्रियानपेक्षास्य[6] शक्तिः सर्वत्र निःसृता ।
अत्यन्तविमलत्वेन तया वक्ति किमद्भुतम् ।। ७१ ।।

---

[1] प्रमाणस्तद्वाक्चं Pr. [2] °क्रिययोद् घटात् Pr. कटान् S.P.
[3] °मनेकश्च्छन्द एव तत् Pr. [4] रूपात्मज्ञान° Pr. [5] वियोगः Pr.
[6] °नपक्षस्य Pr.

प्रवक्तृत्वं स्वचिच्छक्तिप्रवृत्त्यनुगुणस्य च ।
नादस्य विन्दोः प्रसृतिः शब्दानां निःसृतिस्ततः ।। ७२ ।।

शब्दास्तु पारंपर्येण शिवज्ञानानुमापकाः[1] ।
अथवा सद्भिरप्राप्ता श्रद्धया शिवगोचराः[2] ।। ७३ ।।

[3]अन्ये तु सज्जनायाताः प्रकृत्याद्यवगोचराः ।
[4]ततः शिवगिरां बोधो [5]विबोधो नान्यथा गिरा ।। ७४ ।।

न चार्षं पौरुषैर्वाकचैर्ऋषिभिर्दैविकं तथा ।
[6]न देवैर्ब्रह्मणो वाकचं वैष्णवं पद्मजन्मना ।। ७५ ।।

तथा रौद्रं न हरिणा न रुद्रेण शिवात्मकम् ।
बाध्यमूर्ध्वोर्ध्ववैशिष्ट्या[7]दधोऽधो बाध्यमूर्ध्वतः ।। ७६ ।।

शिवागमाविरोधेन शास्त्रं सर्वं व्यवस्थितम् ।
नान्यशास्त्राविरोधेन तत्संवादतया[8]थवा ।। ७७ ।।

शिवशास्त्रं व्यवस्थाप्यं तद् व्याप्तं व्यापकं यतः ।
यस्य यस्य हि शास्त्रस्य यावती व्याप्तिरिष्यते ।। ७८ ।।

तावत्येव भवेद् विप्राः प्रामाण्यं तस्य तस्य च[9] ।
एवमागममाने तु कथिते शिष्टमुच्यते ।। ७९ ।।

तच्चान्यशास्त्रसंसिद्धमोक्षतत्त्वोपदर्शनम् ।
[10]तस्मादिति परं किंचिच्छिवशास्त्रेण बोधितम् ।। ८० ।।

असर्वज्ञप्रणीतत्वं गमयेत् तदसंशयम्[11] ।
प्रमाणमर्थापत्त्याख्यमन्यथा च निगद्यते ।। ८१ ।।

---

[1] °मापकः Pr. [2] शिवगोचरम् Pr. [3] अन्या तु Pr.
[4] ततः . . . . . गिरा, अयमर्धश्लोकः शैवपरिभाषायां त्यक्तः ।
[5] °धोऽन्यथा Pr. [6] तद्देवैः Pr. [7] °वैशिष्याद्यधो° Pr.
[8] संवादितया Pr. [9] तस्य च इत्यनन्तरं, आप्तोक्ति . . . . साधनम् (६०) अयमर्धश्लोकः मुद्रितकोशे दृश्यते । [10] तस्माद्यदि° Pr. [11] तदसंशयः Pr.

दृश्यमानमसार्वज्ञ्ये[1] कल्पयेत् स्वोपपादकम् ।
पशुत्वाख्यं पशुष्वेव सार्वज्ञ्ये[2] शास्त्रतः स्थिते ।। ८२ ।।

तच्चानुमानतो भिन्नं द्वयोर्विषयभेदतः ।
एवं प्रमाणसिद्धानामर्थानां व्यत्ययेन तु ।। ८३ ।।

उपसंहार एष्टव्यः कार्यकारणभावतः ।
नहि कार्योपसंहारादादौ कारणसंहृतिः ।। ८४ ।।

युक्ता तदन्तिमात् कार्यात् पृथिव्याद्युपसंहृतिः ।
तन्मात्रेष्वेव भूतानि तन्मात्राण्यप्यहंकृतौ ।। ८५ ।।

इन्द्रियाणि मनश्चापि सा मतौ सा गुणेषु च ।
ते गुणाः प्रकृतौ सापि रागाद्यं तत्त्वपञ्चकम् ।। ८६ ।।

मायायां लयमायान्ति सा तु नित्योपपादिता ।
मायोपरि विशुद्धाध्वा विन्दौ प्रलयमृच्छति ।। ८७ ।।

बिन्दुः कलादिशक्त्यात्मा शिवाधिष्ठितविग्रहः ।
नित्यमास्ते शिवस्यास्य विषयात्मतयाग्रतः ।
पुनः प्रवर्तते विश्वं जगदारभ्य बिन्दुतः ।। ८८- ।।

इति श्रीमत्पौष्करागमे ज्ञानपादे
प्रमाणपटलः सप्तमः संपूर्णः ।

— ० —

अष्टमः पटलः

— ० —

ऋषयः—

कथं तन्त्रं समुत्पन्नं मन्त्रं वै सह शक्तिभिः ।
भेदास्तत्र कियन्तः स्युः साधनं सिद्धिरेव च ।। १ ।।

---

[1] °मसार्वज्ञं Pr. [2] सार्वज्ञे Pr.

एतत् सर्वं समासेन ब्रूहि नः परमेश्वर ।

ईश्वरः—

आदौ ब्रह्म परं शुद्धमादिवर्णत्वमागतम्[1] ।। २ ।।

तन्त्रमन्त्रत्वमापन्नं शृणुध्वं द्विजसत्तमाः ।
अनादौ सति संहारे[2] कारणं परमेश्वरः ।। ३ ।।

स्वभावादेव जन्तूनामनुग्रहकरः परः ।
ततस्त्वहर्मुखे काले शिवशक्त्योः समागमात्[3] ।। ४ ।।

शिवेच्छयैव सर्वेषामुत्पत्त्यर्थमनन्तरम् ।
तदाभूत् क्षोभितं विश्वकारणं योगमायया ।। ५ ।।

तत्क्षोभतः समुत्पन्नं शास्त्रं नादस्वरूपतः ।
प्रवृत्तं तदधः किंचिद् विकुब्जाकारतः शिवम् ।। ६ ।।

स च बिन्दुरिति ख्यातः शरच्चन्द्रसमप्रभः ।
स चतुर्धा समाख्यातो ज्योतिषां परमो निधिः ।। ७ ।।

शिवेच्छाक्षोभितो बिन्दुस्तदधःशक्तिरम्बिका ।
शशाङ्ककशकलाकारं[4] शक्तित्रयमभूत् ततः ।। ८ ।।

[5]वामा ज्येष्ठा तथा रौद्री सुप्ता नागेन्द्रसंनिभा ।
वामा वै दण्डवज्ज्येष्ठा रौद्री [6]शृङ्गाङ्गवत् स्थिता ।। ९ ।।

सा माया पररूपेण जयाद्या परिकीर्तिता ।
जया च विजया चैव अजिताप्यपराजिता ।। १० ।।

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
इन्धिका दीपिका चैव रोचिका मोचिका परा ।। ११ ।।

---

[1] समागतम् Pr. [2] संसारे Pr. [3] समागमत् Pr. [4] °कारा Pr.
[5] सामा Pr. [6] शृङ्गा भवत्स्थिता Pr.

व्योमरूपा अनन्ता च अनाथानाश्रिता तथा ।
अभिव्याप्तमिदं सर्वं शिवाद्यवनिगोचरम् ।। १२ ।।

ताभ्यः सर्वे समुत्पन्नास्त्रिंशद्वर्णाः सविंशतिः ।
शिरस्यासां स्थिता रौद्री वक्त्रं वामा प्रकीर्तिता ।। १३ ।।

[1]अम्बिका बाहुसंलग्ना ज्येष्ठा वै दण्डवत् स्थिता ।
अकार एष विख्यात आकारं शृणुत द्विजाः ।। १४ ।।

एष एव द्वितीयोऽर्णो दण्डेनाग्रस्थितेन वै ।
शेषाणां लक्षणं नोक्तं मया विस्तरभीरुणा ।। १५ ।।

तस्य शक्तिः स्मृता भिन्ना पञ्चधा दशभेदतः ।
सर्वानुग्राहिका ज्ञेया सर्वशब्दार्थरूपिणी ।। १६ ।।

तैर्विना तु भवेच्छब्दो नार्णो नापि विधेर्गतिः ।
तेन ते सर्वसिद्धीनामालयं परिकीर्तिताः ।। १७ ।।

तेषामेका परा योनिर्यत्तेजः पारमैश्वरम् ।
निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट् ।। १८ ।।

[2]स्वकर्म सहकारि स्यात् कार्यं तस्मात् सहेतुकम् ।
उपादानमतो बिन्दुर्यस्माद् वर्णा न तद्विना ।। १९ ।।

बहुधा संस्थिता वर्णा कृतका चेतना यतः ।
वर्णाश्च स्वरसंयोगात् पदं तैर्वाक्यमिष्यते ।। २० ।।

तस्मादर्थप्रतीतिः स्याद् व्यवहारनिबन्धनात् ।
सर्वज्ञा मातृका ज्ञेया जगतो मातृवत् स्थिता ।। २१ ।।

यथाभूता च सा देवी चिच्छक्तिः स्वप्रभेदतः ।
अवर्गे तु परो देवः कादौ देवी व्यवस्थिता ।। २२ ।।

---

[1] अचिता । [2] नकर्म Pr.

पुनर्भिन्नाष्टभिर्वर्गैः स्वरे देवा [1]विनायकाः ।
ब्राह्म्याद्याः कादिवर्गेषु सप्त सप्तसु संस्थिताः ।। २३ ।।

ईश्वरास्ते च विज्ञेयाः सर्वानुग्रहकारिणः ।
ज्ञानशक्तिस्तथा ज्ञेया मातृका लोकमातृका ।। २४ ।।

तस्यां तु जायते सर्वं वाङ्मयं सचराचरम् ।
उपादानं तु तां कृत्वा वक्ति देवो बहूनि तु ।। २५ ।।

तन्त्राणि कामिकादीनि तत्संख्या संस्थितानि तु ।

ऋषयः——

प्रागुद्दिष्टः शिवोऽमूर्तो वागिन्द्रियविवर्जितः ।। २६ ।।

न शास्त्रकरणे शक्तः सकलोऽर्थात् ततः स च ।

ईश्वरः——

अमूर्तस्यापि देवस्य स्वेच्छासामर्थ्ययोगतः ।। २७ ।।

वर्णादिरचना सर्वा सा भवेत् तत्र कार्यवत् ।
किंतूपदेशकर्तृत्वे सकलः किल स प्रभुः ।। २८ ।।

साकल्यं च यथा तस्य तत् प्रवक्ष्यामि सांप्रतम् ।
सर्वारम्भो नरार्थं यत् निजा पूर्णा तनुः प्रभोः ।। २९ ।।

संपूर्णा पञ्चभिः सद्योवामाघोरनरात्मकैः ।
ईशानसहितैर्मन्त्रैः सा तनुः परमेष्ठिनः ।। ३० ।।

ईशानमूर्धा पुंवक्त्रोऽघोरहृद् वामगुह्यकः ।
सद्योमूर्तिश्च देवोऽयं सकलः परिपठ्यते ।। ३१ ।।

साकल्यं नार्थतस्तस्य कल्पनीयं यथात्मनः ।
नान्यथास्यार्चनं यस्माच्चर्मास्थ्यादिविसर्जनम् ।। ३२ ।।

---

[1] विनायकः Pr.

न च [1]शास्त्रप्रणेतृत्वं तेनायं सकलः स्थितः ।
अनुष्टुप्च्छन्दसा तेन निबद्धं बहुकोटिभिः ।। ३३ ।।

शङ्खैः पद्मैश्च खर्वैश्च निखर्वैरर्थसाधनम् ।
वर्णानां क्षणविध्वंसात् स्फोटोऽर्थप्रतिपादकः ।। ३४ ।।

वर्णव्यङ्ग्यो विभुर्नित्यः सोऽर्थः स्फोटायते किल ।
न वर्णव्यतिरेकेण स्फोटस्यार्थोऽन्तरे स्थितः ।। ३५ ।।

स च भिन्नो न भिन्नो वा तद्भिन्नो नार्थवत् स्थितः ।
वर्ण एव न भेदेन तस्मात् स्फोटो न विद्यते ।। ३६ ।।

क्षणविध्वंसिनो वर्णाः संस्कारो वर्णतः स्थितः ।
पूर्ववर्णजसंस्कारयुक्तोऽन्त्योऽर्णोऽभिधायकः ।। ३७ ।।

न वर्णाः संहतिं यान्ति येन तत्स्मरणं भवेत् ।
यदि तत्र स्मृतिस्तस्य कथमर्थं विमुञ्चति ।। ३८ ।।

तस्मादर्थे प्रवृत्तिः स्यात् संस्कारादर्थनिर्णयात् ।
संस्कारो वर्णजः शक्तौ शक्तिरेकार्थसाधने ।। ३९ ।।

तैश्च शक्तियुतैर्वर्णैर्व्यवहारोऽथ वाचकैः ।
शब्दस्यार्थेन संबन्धः कथं नो निश्चितं भवेत् ।। ४० ।।

न संबन्धोज्झितो यस्माच्छब्दः स्वार्थाभिधायकः ।
न कार्यकारणो योगो यतोऽसौ वर्णहेतुकः[2] ।। ४१ ।।

भूमावर्थो मुखे शब्दः समवायो न संस्थितः ।
न साध्यसाधनान्वेयः स तु बन्धनवत् स्थितः ।। ४२ ।।

प्रत्येयप्रत्ययाख्यस्तु संबन्धान्तरपूर्वकः ।
योजकः स्मर्यते यत्र ततो बुद्ध्येकयोजितः ।। ४३ ।।

---

[1] प्रमाणत्वं Pr. [2] हेतुजः Pr.

न योजको भवेच्छब्दः पुरुषस्तत्र योजकः ।
यो वर्णः केनचित् ख्यातस्तस्मिन्नर्थे स वाचकः ।। ४४ ।।
तावदर्थं न गृह्णाति परसंकेतवर्जितः ।
संकेतास्तत्र मन्त्राणां तेनैव परिकीर्तिताः ।। ४५ ।।
बहवस्तेन संसिद्धाः शास्त्रे वै कामिकादिके ।। ४५- ।।

इति श्रीमत्पौष्करागमे ज्ञानपादे
तन्त्रावतारपटलोऽष्टमः संपूर्णः ।
ग्रन्थश्च संपूर्णः ।

शिवाय गुरवे नमः ।

———

परिशिष्टम् (१)

श्लोकार्धानुक्रमणिका

— ० —

अ

अकस्माज्जायते कश्चित् ५८
अकार एव विख्यातः ६४
अकारादिक्षकारान्ताः ७६
अक्रोधो गुरुशुश्रूषा ५४
अक्षमात्रेण संबन्धः ८७
अगृहीतार्थभेदस्य १८
अग्निः शक्तिं विना कीदृक् ३३
अग्निर्दाहसमर्थोऽपि ८१
अग्नेः प्रकाशे स्वाभाव्यः १६
अघोर इति विख्यातः ६
अचेतनं जगद्विप्राः ८
अचेतनत्वादेकत्वात् ५१
अजडं च जडं वापि ३६
अजडापि तिरोभूता ३६
अज्ञातश्चेदशेषोऽपि ८१
अज्ञाते करणायोगात् ६७
अज्ञानं तु चतुःषष्टिः ६०
अज्ञानातुष्टिरूपत्वात् ६०
अज्ञो जन्तुरनीशोऽयं ६
अणिमादिषु लब्धेषु ५६
अणिमाद्यष्टकस्यापि ६०
अणिमापरमाण्वादेः ५८
अणोः प्रत्यक्षसिद्धत्वात् ३३
अणोरभेदे संसिद्धे ३०
अणोर्नियामकत्वेन २३
अतः क्षणद्वयस्थायी ७०
अत ऊर्ध्वमहंकार° ६१
अत एव गुणात्मत्वं ५२
अत एव घटाकाशे ३०
अत एव प्रकृत्योर्ध्वं° ५०
अत एव हि भावानां ७०
अत एव हि भूतानाम् ७२
अतिरोहितभावोऽपि ३७
अतिसौन्दर्यलावण्या २७
अतीतकाले मृत्पिण्ड° ४४
अतीतवर्तमानेष्यत् ४३
अतोऽन्य एव शैवाग्नि° ८३
अतोऽयमनलोऽत्यन्तं ८३
अत्यन्तविमलत्वेन ६०
अत्यल्पमिदमेते च ३०
अत्यर्थं सा च भिन्नैव ८१
अत्र तेषामभावेन १५
अत्रापि कालमुख्यानि १५
अत्राव्याप्त्यादिदोषाणां ८५
अत्रैवान्तर्गताः सर्वाः ५८
अथ कर्मसमत्वेऽणोः २४
अथ कालः क्रमात् प्राप्तः ४३

अथ कालोऽयमुत्पाद्य° ४५
अथ चित्प्रतिबिम्बेन ३१
अथ चेच्छांकरी शक्तिः ४७
अथ चेन्नित्यसिद्धस्तु ३४
अथ पाशाः पुरोद्दिष्टाः ३९
अथ प्रकृतितत्त्वं तु ५०
अथ प्रकृतितत्त्वात्तु ५२
अथ बिन्दोर्विवेकोऽयं १०
अथ भौवनदीक्षायां ४९
अथ माया क्रमायाता १६
अथवा परसंस्थानं ८
अथवा सद्भिरप्राप्ता ९१
अथ वैराग्यभेदोऽपि ५७
अथाकाशं यथा कुम्भ° ३०
अथाधर्मप्रवृत्तं तम् ५९
अथैश्वर्यविभेदोऽपि ५८
अदत्तास्वीकृतिस्त्यागः ५४
अदृष्टं वेदनीयं यत् २५
अदेहस्यापि कर्तृत्वं ४
अधर्मवृत्तयस्त्वेताः ५९
अधिकारगुणोपेताः २७
अधिकारमलोपेताः २३
अधिकारे क्रियोद्युक्ताः ५
अधिकारे वयं देव १
अधुना ज्ञानपादं तु १
अधुना श्रोतुमिच्छामः ८४
अध्वायं भोग्य उद्दिष्टः १५
अनक्षं चेन्न दृश्येत ७७
अनया नियतं तच्च ४७
अनयोर्ज्ञानयोर्हेतुः ५
अन्यथा वृत्तिभासो वा ३३
अनन्यान्या शिवात् सैव ५
अनन्योऽन्यश्च तच्छक्तेः २
अनलो रूपतन्मात्रात् ८३
अनात्मन्यात्मभावो यः ५९
अनादिकालसंरुद्धात् ३६
अनादिमुक्तश्चेत् कर्ता ९
अनादिरपि संबन्धः ३७
अनादौ सति संसारे ९३
अनार्जवे च सततं ५९
अनिच्छन्न हि भुञ्जानः ४१
अनित्यः काल उद्दिष्टः ४५
अनित्यमाश्रितं सांशम् ७६
अनित्यमेव तज्ज्ञेयं ३३
अनित्यस्य स्वतस्तस्य ४५
अनित्यैषा यदीष्येत १८
अनिलः स्पर्शतन्मात्रात् ८३
अनुगृह्णाति विज्ञान° १५
अनुग्रहे ततो नेष्टं २४
अनुग्राह्यस्य विनये २६
अनुग्राह्यस्त्वमी साधि° २१
अनुभूतार्थविषया ८४
अनुमानं दृढव्याप्त्या ८७
अनुमापयतीत्यत्र ७५
अनुमेयो न दीक्षैषा २६
अनुष्टुप्च्छन्दसा तेन ९६
अनुष्णो वह्निरित्यादि° ८९
अनेकं यज्जडं वस्तु ७६
अनेककालसंरुद्धम्° ६८
अनेकतत्त्वसंक्लृप्तिः ३५
अनेन हि प्रकारेण ७४
अनेनैवावियुक्तत्वात ३८
अन्तःकरणसापेक्षं ८७
अन्तरङ्गास्तथा चान्ये ७
अन्तरेऽवस्थितास्तिस्रः १२
अन्तर्जलगताः सत्त्वाः १२

अन्यच्चेन्द्रियसापेक्षं ८७
अन्यत् कर्मासमं भोग्यं २५
अन्यत्र दृष्टधर्माणाम् ३१
अन्यत्र विषये पश्चात् ४३
अन्यत्रानुपलब्धस्य ३२
अन्यत्रापि प्रवृत्तस्य ३५
अन्यत् स्वतोऽप्यदृष्टस्य ८८
अन्यथा निम्बबीजस्य ८१
अन्यथायं कथं मुक्तः ९
अन्यथालोचिते ह्यर्थे ६२
अन्यथा वृत्तिभासो वा ३३
अन्यथा समकालोऽपि ७०
अन्यथैकप्रकाराहं° ६२
अन्यथोत्तरविज्ञानं १७
अन्यस्तु शक्तिरूपेण ४६
अन्यस्य कार्येणान्यस्य ७७
अन्यस्याप्युपजायेत ६२
अन्यान् विद्याह्वये तत्त्वे २७
अन्याश्च वृत्तयो बिन्दोः १३
अन्ये तु सज्जना याताः ९१
अन्ये श्रुत्यादिसंसिद्धाः २६
अन्यैरपि कृतं कर्म ४८
अन्योऽपि मार्गो वेदादिः ९०
अन्योन्यनियतः कालः २५
अन्योन्यमपि ते दृष्टाः ८०
अन्योन्याध्यासवादोऽयं ३२
अन्वयव्यतिरेकीति ८८
अपक्वैः कर्मभिर्युक्ताः २३
अपाके परमेशाज्ञा २४
अपि भोगेष्वनिच्छन्तं ४७
अपूपादसती पूर्वं २८
अप्रकाशीकृतिर्वापि ३७
अबाधोऽसत्प्रतीपक्षः ८८
अभक्तमद्विजं क्रूरं २६
अभवद् रसतन्मात्रात् ८३
अभावः शक्त्यवस्थातः ७८
अभावोऽनुपलब्धिर्हि ७७
अभावोऽयं पदार्थस्य ७७
अभावो भावधर्मस्तु ७७
अभिमानानुसंधान° ६७
अभिमाने तु संकल्पे ४०
अभिव्यञ्जकसंबन्धात् ६९
अभिव्यञ्जकसंयोगात् ७९
अभिव्यञ्जकहेतूनां ६९
अभिव्याप्तमिदं सर्वं ९४
अमलेऽपि स चेत् सक्त्यै ३४
अमी धर्मा घटस्यैव ६९
अमूर्तस्यापि देवस्य ९५
अमूर्ताश्चेद् विवादोऽयं ७५
अम्बिका बाहुसंलग्ना ९४
अम्भोधिमथनोद्भूत° १
अयमित्यात्मकः सर्वः ६१
अयस्कान्तोऽपि योक्तारम् ९
अयोवद् द्रव्यभावित्वात् ७८
अरतिर्मन्दता दैन्यं ५३
अर्थक्रियाकरत्वं च ७०
अर्थक्रियाकरत्वेन ७०
अर्थक्रियाकारिता हि ७०
अर्थादेव स्थिता मध्ये २३
अर्थानां वाचको भूयात् ८०
अर्थान्तरत्वे तज्ज्ञान° ७१
अर्थो गृह्येत तन्नाशु° ६६
अलं स्वतोऽसमर्थस्य ६९
अलमेकेन चेद् द्वाभ्यां ४१
अल्पार्थग्राहकत्वेन ६४
अवकाशं विना क्वापि ७८

अवकाशः पुनः सोऽयं ७८
अवकाशस्तु पृथ्व्यादेः ७७
अवर्गे तु परो देवः ९४
अवस्थानं च बन्धेन २२
अविद्यादिसमायुक्तः ४९
अविभागस्य भागोक्तौ ३७
अविरुद्धा यतः प्राप्तिः २१
अविशिष्टे तु भोक्तृत्वे १८
अवैराग्यं च शतधा ६०
अव्यक्तगुणसाम्यं तु ५२
अव्ययः परिपूर्णश्च ९०
अशक्तिरेवं संक्षेपात् ६०
अशास्त्रीयक्रियात्यागात् ५४
अशीतिसंख्यया सा च ५५
अशुद्धाध्वनि ता वाचः १३
अश्रोत्रविषयत्वेन ८०
अश्वमेधो द्विजवधः २५
अष्टभेदमनैश्वर्यं ६०
अष्टसंख्यमनैश्वर्यं ६१
अष्टारेऽस्मिन् महाचक्रे ६१
अष्टावनन्तसूक्ष्माद्याः २७
अष्टावेता यशस्विन्यः ६
अष्टौ धर्मादयो भावाः २०
असंभवोदयत्वेन ५२
असंविदात्मकत्वेन ८५
असत्यमपि तत्सत्यं ५४
असत्सूपाध्यभेदेन ७१
असन्नपूर्वं क्रियते ८८
असर्वज्ञप्रणीतत्वं ९१
असामञ्जस्य रोधेन ४१
असिद्धिः प्रथमो हेतुः ८८
अस्ति प्रकाशमानोऽपि १९
अस्ति प्रमाणसद्भावं १७
अस्तु मानं प्रमेयं च १७
अस्तु स्वाभाविकश्चित्रः १९
अस्य प्रवृत्तिः स्वाभाव्ये १९
अहंकारः पृथक् सार्व° ६२
अहंकारः समुद्दिष्टः ६९
अहंकारमनोबुद्धि° ४०
अहंकारात्तु भूतादेः ६२
अहंकृदन्तर्भोगोऽतः ६९
अहंकृदेकमेष्टव्यं ६१
अहमात्मैकरूपस्तु ६१

आ

आकाशं पवनस्तेजः ७६
आकाशाज्जायमानोऽसौ ७९
आगन्तुकं चेच्चिच्छक्तेः ३३
आगोपालाङ्गनाबालं १२
आज्ञानुपालनं नित्य° ५५
आज्ञाविधानं ब्रह्मादौ ५८
आत्मनो बहवः प्रोक्ताः २९
आत्मनो बहवो जन्म° २९
आत्मा नात्मान्तराभावात् ३६
आत्मा नित्यः प्रमेयत्वात् ८९
आत्मा मलावृतः सर्व° ३४
आत्मेतरस्य ज्ञातृत्वा° ३१
आदौ ब्रह्म परं शुद्धं ९३
आद्यश्चेन्मुक्तितस्तस्य ९
आद्योऽनध्यवसायात्मा ५३
आध्यात्मिकादिदुःखेभ्यः ५७
आनीयते तयोर्मध्ये ४५
आन्तरं बाह्यसापेक्षं ६७
आन्तरे सति बुद्ध्यादौ ६७
आपदो भीतितो वापि ५४
आपिङ्गलजटाजूट° १

आप्तोक्तिरागमः सोऽपि ८९
आभिः सिद्धिभिरष्टाभिः ५६
आभ्यो न परमो बन्धः १२
आमुष्मिकत्वात् किंतूर्ध्वं ५३
आयुर्भोगो गलूच्यादि २४
आरब्धमप्यनारब्धं २१
आरब्धमेव भोग्यं स्यात् २१
आर्जने रक्षणे चोर° ५७
आर्जवं चेति नियमः ५४
आर्जवं तस्य तत्प्रोक्तं ५५
आर्जितानि तथैवेयम् ४७
आलोकने यत् करणं ३९
आलोकने हि संयोगः ७७
आलोकयति बाह्यार्थं ६८
आलोचनत्वं व्यापारः ६८
आलोचनादिबुद्ध्यन्तैः ६९
आलोचितस्य मनसः ६८
आवृत्तिश्च न युक्तास्य ३६
आशुत्वेनाभिमानं तत् ६६
आश्रयाश्रयिभावोऽतः ७४
आसां वीर्यं विभागश्च ६
आस्ते चेदुलभ्येत ८०

इ

इच्छानुल्लङ्घ्य महिमा १५
इच्छयैवानुगृह्यादौ २६
इत ऊर्ध्वं कलादौ ये ५७
इतरस्त्वीशविद्याख्य° १४
इति चेत् तन्न वाय्वादिः ६७
इति तं परमेशानः २७
इति तस्माच्छरीरात्मा २९
इति धर्मादयो भावाः ६०
इति निश्चित्य संतुष्टाः ५६
इति प्रोक्ताः पदार्थाः षट् १
इत्यादिगुणतः पृथ्वी ७७
इत्यादिवदतश्चक्षुः ७३
इत्याहुरपरे तत्र ७७
इत्युक्तं तन्न युक्तं स्यात् ९०
इत्येवं तुष्टयः प्रोक्ताः ५८
इत्येवं नियमे न स्यात् ४६
इदमित्येव सर्वत्र ६१
इन्द्रियग्राहकं वस्तु ७३
इन्द्रियाणि मनश्चापि ९२
इन्द्रियापेक्षया शक्त्या ८७
इन्धिका दीपिका चैव ९३
इष्टं कारणपूर्वत्वं ५१
इष्टार्थोक्तिः प्रतिज्ञा तु ८७
इष्यतां कुण्डलिन्याख्यं ११
इष्यते स कथं कर्ता ९

ई

ईशः प्रवर्तको यस्मात् ८
ईशानपुरुषाघोर. ६
ईशानमूर्धा पुंवक्त्रः ९५
ईशानशेखरी सा च ६
ईशानसहितैर्मन्त्रैः ९५
ईशानी परमा काष्ठा ६
ईश्वरप्रणिधानेन ४३
ईश्वरश्च स एव स्यात् ३
ईश्वरास्ते च विज्ञेयाः ९५

उ

उच्चारानन्तरं ध्वस्ताः ८०
उत्क्षेपणादिव्यापार° ८३
उत्पादयति विश्वं सं° ४५

उत्पादयति सा माया २
उद्धृत्य विप्रा युष्मभ्यं ९०
उद्युक्तस्तु सदा कार्ये ३८
उपसंहार एष्टव्यः ९२
उपसंहृतकार्यात्मा २
उपादानं तु तां कृत्वा ९५
उपादानत्वतो हेतोः ११
उपादानमतो बिन्दुः ९४
उपाधिमन्तरा न स्यात् ७२
उभयोः कृषिसाम्यं तु १८

ए

एकं प्रमाणमेकं तद् ९०
एककाले तु शाखेन्द्वोः ६६
एकद्वित्रिचतुष्पञ्च° ७२
एकमेव स्थितं तद्वत् ३०
एकस्मिन्नेव देशे चेत् ७५
एकस्मिन् भुज्यमाने तु २१
एकस्यान्यस्य पश्यामि ६२
एकानेकविभागाढ्या ७५
एकाहस्याप्यपायेन ५७
एतच्चेन्द्रियसापेक्षं ८६
एतत्सर्वं समासेन ९३
एताः सदाशिवावस्थाः ६
एतानि त्रीणि तत्त्वानि° ६
एतान्येव तु शोध्यानि ६
एताश्च भूताद्यव्यक्त° ५८
एताश्च वृत्तयोऽणूनां १२
एताश्चोपाधिभेदेन ५६
एतासु शक्तयस्तिस्रः ८
एते धर्मादयश्चाष्टौ ५४
एते पञ्च यमाः प्रोक्ताः ५५
एते मलवतां पुंसां ३६
एते च मूर्तिमत्वेन ... ७५
एतेषां यस्य वैराग्यम् २७
एतैर्लक्ष्मरविच्छिन्नैः २६
एभिर्विहीना चिच्छक्तिः ८४
एवं कालः समासेन ४७
एवं चिच्छक्तिरप्येषा ३८
एवं चेत् चेतनाः सन्ति ९
एवं चेन्मूर्तमाकाशं ७७
एवं ज्ञानादिसंस्कारः ५३
एवं धर्मादयश्चाष्टौ ५४
एवं पुरुष आख्यातः ५०
एवं प्रकृतितत्त्वं तु ५१
एवं प्रपञ्चावस्तुत्वे १७
एवं प्रमाणसिद्धानां ९२
एवं प्रसाधिते चान्तः ६४
एवं बिन्दुः समासेन १५
एवं बौद्धेऽपि रागेऽस्मिन् ४१
एवं मन्त्रास्तु पञ्चैते ५
एवं रागः समासेन ४३
एवं वर्णाः क्रमस्थाश्च ८१
एवं वस्त्वात्मकं विश्वं १८
एवं विदुः समासेन १५
एवं विरोध आपन्ने ३
एवं संक्षेपतः प्रोक्तः ६१
एवं संक्षेपतो विप्राः ५३
एवं संसारतो भीतम् २६
एवं सति त्वगादेश्च ६७
एवं सत्यात्मकं विश्वं १८
एवं समासतः प्रोक्ताः २२
एवमन्येष्वपि ज्ञेयं ६५
एवमागममाने तु ९१
एवमालोचिते ह्यर्थे ६९
एवमेवाणवो युक्त° २३

एवमेष्वपि सत्स्वेव ३६
एष एव द्वितीयोऽर्णः · · · · ९४
एष बन्धुरियं भार्या ३६
एषा युक्तिः परा काष्ठा ५६
एष्योऽतीतश्च कालौ यौ ४४

ऐ

ऐक्यं कथं तयोर्विप्राः ६१
ऐश्वरं तदधस्तत्त्वं ५
ऐश्वर्यं नात्र वशिता ७
ऐश्वर्यं परमा काष्ठा ७
ऐश्वर्यं स्वामिता सर्वम् ७

क

कथं कर्मानुसारेण ११
कथं कर्मान्वयाभावः १४
कथं तदर्थे संबन्धः ८६
कथं तद्वर्तिनां भोगः १४
कथं तन्त्रं समुत्पन्नं ९२
कथं ते तान्यहंकारात् ५४
कथं पुनर्दविष्ठार्थं ६६
कथं महार्थसंहारे ४६
कथमत्र स्थितिस्तेषां ४९
कथ्यन्ते तान्यहंकारात् ६४
कदा द्रक्ष्यामि देवेशं २६
कर्ता चेत् तत्प्रवृत्त्यर्थं ३
कर्ता महेश एवेष्टः ४
कर्ता विश्वस्य पुत्रादि ७
कर्तृत्वं द्विविधं विप्राः ३
कर्तृत्वप्रतिबन्धत्वात् ४
कर्तृत्वमप्यणोरेव ६८
कर्मणां तु तदायत्तम् २३
कर्मणापि न च ज्ञानं ३४
कर्मणा मनसा वाचा ५४
कर्मणामार्जितानां तु ४७
कर्मणैष्यत्कलायोग्यः° २२
कर्मणो ऽप्यस्य साम्ये वा २४
कर्मत्वात् कृषिवत् तस्मात् ४७
कर्मनाशान्मलस्यापि २५
कर्मभिर्बोधकाद्याख्यं २
कर्मसाम्यं च भोगेन २४
कर्मात्र समवेतायाः ६८
कर्मादिनैरपेक्ष्येण १५
कर्मान्तरं समुच्चित्य २५
कर्मेन्द्रियाणि वाक्पादौ ६७
कर्मेन्द्रियाणि सार्थानि ६७
कर्मेह त्रिविधा दृष्टा° २४
कलया कर्तृभूतस्य ३९
कलया व्यञ्जते तत्तु ३९
कलातत्त्वान्तरोधिन्या २३
कलातोऽनन्तरं विद्या ४१
कलातो जायते रागः ४१
कलादिकरणव्यक्त्या ८६
कलादिक्षितिपर्यन्तं १६
कलादिक्षितिपर्यन्ता २
कलादितत्त्वसंयोगात् १५
कलादिपञ्चकस्यैव ४९
कलादिपञ्चतत्त्वानां ४९
कलादिभिस्त्रिभिस्तत्त्वैः ४३
कलादिरिह वस्त्वात्मा १६
कलाद्यभावे कर्तृत्व° ४९
कलाविद्या च रागश्च · · · · · ३९
कलाविद्याह्वयौ बन्धौ ४१
कलावृत्तिं विनैतस्य ४०
कल्प्यते पुंसि न स्यात्तु ५३
कस्मान्न कर्म चिच्छक्तेः ३५

कांश्चिद् भोगाह्वये तत्त्वे २६
काकाक्षिवन्मनश्चारः ६९
कामुकस्य स्त्रियं दृष्ट्वा ५७
कानीह तानि कर्माणि १८
कारणं गुडपिष्टादि २८
कारणं जगतो नाणुः ६४
कारणं तच्च कर्मैव २०
कारणत्रयमात्रं यत् ७१
कारणत्वावशिष्टोऽत्र २८
कारणस्य कुतस्त्यो वा ७०
कारणाद् गुणसंक्रान्तिः ८३
कारुण्ये स शिवः कर्ता २६
कार्यं च करणीयं तु ५
कार्यकारणरूपेण ७०
कार्यकारणभावोऽतः ७०
कार्यता चास्य विश्वस्य ९
कार्यत्वादनयोः सिद्धं ९
कार्ययोः करणं तस्मात् २०
कार्यस्य जननं सत्त्वात् ५१
कार्यात् प्रकाशकं यत्तु २०
कार्याभावादुदासीना ५
कार्येष्वपि च हेतुत्वं ८१
कार्यैरणूपकार्यत्वात् २०
काल एको यदीष्येत ४४
काल एको विभुर्नित्यः ४४
कालः प्रवृत्तमेवाणुं ४१
कालाग्निर्भुवनेनैव ५०
कालाग्न्यादिषु सर्वेषु ५०
कालातीतस्तु साध्यस्य ८९
कालावच्छेदशून्यत्वात् ४५
कालुष्यं नोत्सहेद् वैरं ५४
काले तु सति जायेरन् ४४
कालोऽपि नियतिस्तद्वत् ४१
किं कर्मणात्र विप्रेन्द्राः १४
किं च कर्मान्वयाभावात् १४
किं च कर्मोज्झिताः सर्वे ११
किं च कार्यसमुत्पत्तिः ७५
किं च तीव्रादयः शब्दाः ७६
किं च देहो ममेत्यादि २९
किं च द्रव्यं मनोऽनेक° ३३
किं च पक्षीकृतः सोऽपि ९
किं च प्रपातटाकादि ५३
किं च प्रागनुभूता या ७१
किं च बाल्ये च वार्धक्ये २८
किं च भोगप्रसक्तौ तु ३५
किं च बुद्ध्यादयोऽन्येभ्यः ४०
किं च बुद्ध्यादिभिर्ज्ञानं ३१
किं च भोगैकहेतुस्तत् ३५
किं च मायाद्युपादानं ११
किं च मूकाद्यनुत्पत्तिः ६५
किं च मूर्तोपरोधेन ६४
किं च यस्य तु यो धर्मः २८
किं च येन प्रमाणेन १८
किं च यो यत् स्वभावस्तु १९
किं च रुद्राणवो येन १०
किं च शब्दानुसंविद्धाः ११
किं च सर्वेषु कुम्भेषु ६२
किं च सादात्मिको योगः १०
किं च सास्नादिमत्पिण्डे ६३
किं चाक्षवस्तुसंयोगात् ४०
किं चाजडं जडान्नो चेत् ३६
किं चाजडं जडेनैव ३६
किं चाणवः सावयवाः ७४
किं चादृष्टात्मकं कर्म ४८
किं चानुभूयते ह्यात्मा ३१
किं चानुमानमत्रान्यत् ९

किं चानेकत्वमेतेषां ७६
किं चाभिव्यञ्जकं कर्म ३५
किं चाभिव्यञ्जको यत्र ३२
किं चायं प्रत्ययात्मोक्तः ३४
किं चायं मलिनो नो चेत् ३४
किं चार्थबोधका वर्णाः ८०
किं चाहिरज्ज्वोः साम्येन १७
किं चैकस्य पदार्थस्य ७२
किं चैतदन्यथा ज्ञानं° ३३, ३४
किं चैतद् ग्राहकत्वं च ३३
किं चैते सर्वसामान्याः १९
किं चैष्यद् भोगहेतूनि २४
किं चोर्ध्वभावितत्त्वेषु ११
किं तु कर्मानुसारेण ३९
किं तु तान्यत्र शुद्धानि १५
किं तु बिन्दोरणूनां च २
किं तु बुद्ध्यादयोऽप्यन्ये ४०
किं तु भोगेषु खिन्नानां ४६
किं तु सत्त्वोपकारित्वे ८१
किं तु स्वदृक्क्रियाशक्ति° २
किं तु स्वभावसिद्धा सा ५१
किं तूत्पत्तिः पदार्थानां ४५
किं तूपदेशदातृत्वे ९५
किं ते शब्दादयो भिन्नाः ४६
किमादिमुक्तः स्यात् कर्ता ९
किमेतेनाधिकारेण २७
कुटुम्बस्यैवमाद्या तु ३६
कुतो वा घटनिष्पत्तिः ७०
कुतो वा नेष्यते पूर्वम् ८१
कुम्भादेश्चाविशेषेण ६८
कृतार्थोऽहमतो यद्वा ३६
कृषिकर्तार आज्ञातः ४८
कृष्यादिवत् प्रधानस्य २१
कृष्यादेरपि संस्कारः ५३
केचनावीचिमुख्येषु १८
केचिदाहुः क्रमेणेति ६३
केचिन्मनोऽणुमिच्छन्ति ६३
केनाप्यध्यासितं विश्वं ८८
केनोक्तं भिन्नकार्याणां २८
केवले कल्पितेऽर्थेऽस्मिन् ६९
केवलान्वयिरूपेण ८८
को वा दर्शयिता शंभोः २६
कौलाश्च स्वात्मवादेन ५५
क्रमाक्रमविभागाभ्यां ७०, ७१
क्रमाच्चेदर्थ एवास्तु ८१
क्रमेण प्रत्ययात्मानः ६०
क्रमेणैव स्थितिस्तेषां ६३
क्रमेणैवार्थसंसिद्धिः ६३
क्रियते कथमाद्यस्य ८२
क्रियतेऽग्निगता शक्तिः ३७
क्रियाचर्ये प्रसादेन १
क्रिया प्रकाशनिष्ठात्मा ५१
क्रियाभिरेव विद्यन्ते ४७
क्रोधे नित्यादिलोपे वा ५९
क्लैब्याक्लैब्यात्मनोस्तत्र २५
क्वचित् प्रतिग्रहादिभ्यः ५८
क्वचिदन्तःस्फुरन्नाद° ८०
क्वापि स्थितानां भावानां ७८
क्षणविध्वंसिनो मन्त्राः ९६
क्षणिकत्वं तु नित्यायाः ६९
क्षणिकत्वं पदार्थानां ७१
क्षणिकत्वं ब्रुवाणानां ७०
क्षणिकत्वे कुतस्तस्याः ७१
क्षुब्धं कार्यकरं तस्य ११
क्षोभक्रोग्रमहातेजाः ५२

ग

गङ्गायां ग्राम इत्युक्ते ४९
गणना चोदिता चैव ३८
गत्वार्थग्रहणं नैषां ६७
गन्धादिरपि तीव्रादि ७८
गमागमादिव्यापारः ७६
गात्रप्रक्षालनं शौचं ५५
गुणतत्त्वात् परा बुद्धिः ५३
गुणा एव समावस्थां ५०
गुणा एवानुभूयन्ते ७३
गुणतत्त्वे स्थितिस्तेषां ५१
गुणस्यापि गुणात्मत्वे ७३
गुणाः सत्त्वादयश्चैवं २०
गुणादिक्षितिपर्यन्त ५०
गुणानां चलवृत्तित्वात् ५६
गुणानां तु चलावस्था ५०
गुणानां संहतिर्द्रव्यं ७९
गुणान्तरेऽपि तुल्यः स्यात् ७८
गुणा विभागरूपा तु १६
गुणा विभागरूपा सा १६
गुणाव्यक्तनराश्चैव ५५
गुणी चाकाशमित्युक्तं ७६
गुर्वङ्गनाभिगमने ५९
गृह्णाति प्राप्तमेवार्थं ६७
गोलकस्य तदव्याप्त्या ६५
गोलकादीन्द्रियत्वेन ६५
ग्रहणं स्यादमूर्तत्वे ६४
ग्रहणाभावतस्तस्य ३९
ग्राहकत्वेन तत्सिद्धेः ३९
ग्राहकव्यवसायात्मा ६०
ग्राह्यं करणसापेक्षं ४०
ग्राह्यत्वं चेन्द्रियैरन्यैः ६४
ग्राह्याभावे यथा नेत्रे ४२

घ

घटव्यक्तौ च चोद्योऽयं ८१
घटसंज्ञायमानोऽयं ४४
घटस्यातीततापि स्यात् ४६
घटादिद्रव्यविज्ञानं ८७
घटान्तःस्थस्य दीपस्य ६६
घटादेरपि सत्तायाः ८३
घोरो मलादिसंसारः ६
घ्राणाद्यवयवोपेतः ६५

च

चक्रादयो घटोत्पत्तौ ७१
चक्रादिवत् घटोत्पत्तौ ४४
चक्षुराधारभूतस्य ६६
चक्षुषालोच्यते ह्यर्थे ६२
चतुःषष्टिगुणं बौद्धं ५९
चतुर्गुणं तु गान्धर्वं ५९
चत्वारि तानि नामानि ८३
चार्वाका भूतसंसिद्धाः ५५
चिच्छक्तिः करणं बुद्ध्या ४०
चिच्छक्तिरिच्छारूपैव ४१
चिच्छक्तिश्च परापेक्षः ८४
चिच्छक्तेरर्थसंयोगात् ८६
चिच्छक्तेर्नित्यसिद्धायाः ३४
चिच्छक्त्यानन्त्ययोगाच्च ८७
चितो घटादिरूपेण १७
चितो विवर्त एवेष्टः १०
चित्तस्य संयमस्तत्र ५४
चित्संयोगविहीनानां ८६
चिद्विवर्तस्तथा सत्यः ११
चिरकालस्थितो दीपः ३४
चेतनं मन्यमानास्तत् ५६
चेतनेन गवां यस्मात् ८

चैतन्यं ज्ञत्वकर्तृत्वं ३९
चैतन्यदर्शनाद् देहे २८
चैतन्यव्यञ्जका ह्यत्र ३९
चैतन्यस्येह नित्यस्य ३०
चैतन्येनापि युक्तः सन् ३०
चोदितं सत्यमेवैतत् ५

ज

जगत्पूरणहेतुत्वात् ६
जडत्वे सत्यनेकत्वात्· · · · ४५
जडे जडस्य संक्रान्तिः ३१
जडेनाजडरूपस्य ३६
जडेनैवाजडं यस्मात् ३६
जननाद्यास्ततः कर्तृ° ५१
जननी जगतो जन्म ८
जन्मनाशादयो धर्माः २९
जन्मादिभेदवन्तोऽतः ३०
जया च विजया चैव ९३
जानन्नपि च विप्रेन्द्राः ५५
जायेरन् बिन्दुवैचित्र्यं १२
जिह्वा घ्राणं च पञ्चैते ६४
ज्योतिःशास्त्रविदस्तद्वत् ५५
ज्ञप्त्यात्मैवायमुद्दिष्टः ३१
ज्ञातश्चेत् तेन संबन्धः ८१
ज्ञाता चायं न तु ज्ञप्तिः ३१
ज्ञातृत्वं नैतदध्यासः ३१
ज्ञातृत्वमपि तन्नित्यं ३२
ज्ञातृत्वमपि तेनास्य ३२
ज्ञातृत्वमपि यद्यस्य ३२
ज्ञानं बुद्ध्यात्मकं यत्तत् ५५
ज्ञानक्रिया तु शक्तिर्या ६८
ज्ञानक्रियात्मिका सापि ४
ज्ञानमेव स्थिरं नित्यं ७१
ज्ञानशक्तिस्तथा ज्ञेया ९५
ज्ञानसाध्येऽधिकारो हि १
ज्ञानस्य प्रागभावश्चेत् ३३
ज्ञानस्याभ्यन्तरत्वेन १७
ज्ञानाभावोऽत्र नाज्ञानम् २०
ज्ञानाभावो न चाज्ञानं ३३
ज्ञानेन्द्रियाणां ज्ञातृत्व° ६७
ज्ञायन्ते येन पत्याद्याः १
ज्ञेयास्तन्मात्रसंसिद्धाः ५५

त

तं प्रत्येवैश्वरी शक्तिः २४
तच्च द्रव्यं यतः कर्म ३३
तच्च मायोद्भवं यत्तु ५०
तच्च शब्दगुणं ज्ञेयं ७८
तच्चानुमानतो भिन्नं ९२
तच्चान्यशास्त्रसंसिद्ध° ९१
तच्चाशक्त्या भवेत् सा च ६०
तच्चेह पञ्चावयवं ८७
तच्चेह विभुधर्मत्वात् ३२
तच्चैकरूपमाकाशं ३०
तच्चैतन्यमधिष्ठातुं २८
तच्चैतन्यमिति प्रोक्तं २८
तज्जन्मन्येव फलदः २४
तज्ज्ञानपादमित्युक्तं १
ततः क्रमेण नेत्राद्याः ६४
ततः कियोपसंहारे ४६
ततः प्रथमसृष्टेस्तु ४
ततः प्रागेव संसिद्धं ७८
ततः शक्तिरशेषार्थ° ८३
ततः शिवगिरां बोधः ९१
ततः संविदि यद्रूपं ७१

ततः समासादैश्वर्यं ५९
ततः स्थूलैस्तथा वर्णैः ८०
ततः स्वभाववादोऽयं २०
ततश्च गुण एवेष्टः ७९
ततश्च नाविकारित्वं ३
ततश्च नैककालोऽयं ४४
ततश्च वर्तमानादि ४४
ततश्चाज्ञानभेदो यः ६०
ततश्चाद्यमनोः कार्यं ८२
ततश्चायं कलाबन्धः ३९
ततस्तच्छून्यकल्पं स्यात् ३९
ततस्तत्प्रान्तवर्तिन्यां ४९
ततस्तापो भवेदन्तः° ३६
ततस्तु चक्षुराद्यैश्च ४०
ततस्तु जन्मनाशाद्याः २९
ततस्त्वहर्मुखे काले ९३
ततस्त्वैश्वर्यभोगेन ५९
ततोऽर्थक्षणिकत्वेन ७२
ततोऽवशिष्टभूतेषु ६५
ततो गन्धादिनोक्तेन ६६
ततो धर्मेण युज्यन्ते ५९
ततो न कुत्रचित् किंचित् २०
ततो न परमाणूनां ७६
ततो मुक्त्यर्थमासन्नं २७
ततो मूर्तपृथिव्यादि° ७५
ततो वर्णैरभिव्यक्तः ८०
ततो विद्याकलातत्त्वात् ३९
ततो व्यापकमेवेष्टं ६५
तत्कथं तदभावोऽयं ७८
तत्कथं तदुपादानं ५०
तत्कथं तैस्ततोऽन्यत् ७३
तत्कर्म कर्त्रा न व्याप्तं ४८
तत्कर्मायत्तदेहादेः १४
तत्कार्यस्य विनाशस्तत्° ८२
तत्कार्याणामनेकेषां ८१
तत्कार्यायत्तदेहादेः १४
तत्क्षोभतः समुत्पन्ने ९३
तत्तद्गुणविभागस्तु ७३
तत्त्यागे विषयत्यागात् ४३
तत्त्वं विद्याह्वयं किं तु १३
तत्त्वं स एव सादाख्यं ३
तत्त्वं सदाशिवं तद्वत् १३
तत्त्वानामुपसंहारे २३
तत्पक्षे परमाणूनां ७३
तत्प्रमाणं प्रमाणं वा १८
तत्र ग्राहकनिष्ठोऽयं ४३
तत्र तत्रात्मबुद्धचैव ५५
तत्र यः क्षुब्धभागोऽस्य ५
तत्र संवेदनात्मा यः···· ४३
तत्र सर्वत्र तत्कार्य° ३२
तत्राद्यमक्षयोग्यस्य ८८
तत्रानियतयोः सद्यः २५
तत्रापि च्छिद्यते पुंस्त्व° ५०
तत्रापि तेषां हेतुत्वे २९
तत्रावश्यं तु तत्कर्ता २९
तत्रेदं पौष्करं तन्त्रं ९०
तत्रेन्द्रियानपेक्षं च ८७
तत्संबन्धाद् विमुच्येरन् ४७
तत्सद्भावे ततः शंभोः २७
तत्सर्वं कथयेशान १८, ३८
तत्सर्वं बौद्धमेष्टव्यं ६९
तत्सुखाहरणं यस्तत् ६०
तथा किमिति नेष्टोऽत्र ४४
तथात्वे तद्दविष्ठार्थ° ६५
तथा नियतकालोऽयं २४
तथापि बाधकं चैतत् ३४

तथा प्रवृत्तिनियम° ७३
तथा बुद्ध्यादितत्त्वानां ५२
तथामुष्मिकयोरश्व° २५
तथा रौद्रं न हरिणा ९१
तथाविधाणवो लोके ७६
तथा संनिधिमात्रेण ४
तदन्यकार्यहेतुत्वात् २९
तदप्यचारु यत्कर्म ६५
तदप्यसारं भावानां १९
तदभिव्यञ्जकं व्योम ७९
तदर्थमेष्टव्यानीह ६८
तदलाभे विषण्णत्वं ३५
तदव्यक्तमिति प्रोक्तं ५०
तदसत्कर्मवशतः ६३
तदसच्चक्षुरादीनां ७३
तदसत्तामसत्त्वेन ६४
तदसत्तैजसत्वेन ६५
तदसत्परसंवित्तिः ६३
तदसत्प्रलयस्यास्य ४६
तदसत्संविदर्थेन ७२
तदसद्वेगतः शब्दः ६७
तदसद्व्यवधानेन ८०
तदसन्महतोऽप्यल्प° ६३
तदसन्मूर्तिमत्कार्यं ७५
तदाक्रान्तः कलाद्याढ्यः ४९
तदा तद्वलवद्भोग्यम्° २५
तदा प्रकृतिभोग्यत्वे ४९
तदा प्रत्यक्षमित्युक्तम् ८६
तदा प्रागनुभूत्यैव ६७
तदाभूत् क्षोभितं विश्वं ९३
तदा लयाह्वयं तत्त्वं २
तदा विज्ञानकैवल्यं २५
तदा विद्यादिमात्रस्य ४९
तदा संजायते ज्ञानं ६८
तदाहंवेदनं भोगः ४०
तदा ह्येतत्करोमीति ५
तदिह ज्ञानमात्रं चेत् ३३
तदेवं प्रकृतौ स्यातां १९
तदेव ब्रह्मचर्यं स्यात् ५४
तदेव मानमेष्टव्यं ८५
तदेवमात्मचैतन्यं ३०
तदेव शक्तिपातेन २१
तदैवमात्मचैतन्यं ३०
तद्देशक्रमणान्मेरोः ९०
तद्देहस्यापि कर्तृत्वात् ४
तद्देहे जातबाल्यानां २९
तद्धर्मभूतं ज्ञानं च ३२
तद्धेतुभूतमाकाशं ७६
तद्धेतोः कार्यभूता सा ७७
तद्भेदको न चेदर्थः ७२
तद्योग्यतानुसारेण २६
तद्वत् स्वतोऽमी सर्वज्ञः ३३
तद्वन्नयायविदो बुद्धि° ५६
तद्वर्तिनो न सकलाः २३
तद्विघातत्रयाज्ज्ञान° ५६
तद्विधर्मो विपक्षः स्यात् ८८
तद्विनिश्चयरूपोऽयं ४०
तद्विनाशे प्रवृत्तेयं ४७
तनुभोगेन्द्रियाद्यैश्च १३
तन्त्रमन्त्रत्वमापन्नं ९३
तन्त्राणि कामिकादीनि ९५
तन्त्रान्तरेषु ये सिद्धाः १०
तन्त्रेऽस्मिन्नपराः प्रोक्ताः ५६
तन्न पूर्वादिदिग्भागैः ७५
तन्न प्रमातृमेयादि ८६

तन्न बुद्धं जडत्वेन ६९
तन्न रूपैकनिष्ठत्वात् ७३
तन्न सावयवानां तु ७६
तन्नानैकान्तिको हेतुः ७८
तन्नार्थवाचका वर्णाः ८१
तन्नावयवमात्राणोः ७४
तन्नाशमन्तरा यस्मात् ३६
तन्निवृत्त्यर्थमादौ तु ३९
तन्निवृत्त्यविनाभूत° १२
तन्नैषां चाविशेषेण ४३
तन्मनः कथ्यते तन्त्रे ६३
तन्मात्रपञ्चकाज्जातं ८३
तन्मात्राणि पृथिव्यादेः १६
तन्मात्राण्यपि वर्ण्यन्ते ७२
तन्मात्रेष्वेव भूतानि ९२
तमसो वृत्तयः प्रोक्ताः ५३
तमो मोहो महामोहः ५९
तयानुग्रहरूपिण्या २६
तयोः समुच्चयायोगात् २५
तयोरर्थान्तरत्वेन ७०
तर्हि चित्प्रतिबिम्बेन ३१
तर्हि द्वितीयमन्त्रस्य ८९
तस्माच्छुद्धाध्वनश्चास्य ११
तस्माज् ज्ञानविशेषास्ते २०
तस्मात् कैवल्यसंसिद्ध° ५५
तस्मात् तेऽप्यत्र कर्तारः ४८
तस्मात् प्रकृतितत्त्वात्तु ५०
तस्मात् प्रतिपदार्थं च ४८
तस्मात् प्रपञ्चसद्भाव° १७
तस्मात् प्रमेयभावोऽपि १७
तस्मात् सकल एवाणुः ४९
तस्मात् स्थूलोऽहमित्यादि २९
तस्मात् सदाशिवो ज्ञान° ५
तस्मादनुग्रहाच्छक्तिः ५७
तस्मादनेन रागस्य ४१
तस्मादमूर्तमेकं यत् ७६
तस्मादर्थप्रतीतिः स्यात् ९४
तस्मादर्थे प्रवृत्तिः स्यात् ९६
तस्मादस्माकमीशान° ८३
तस्मादिति परं किंचित् ९१
तस्मादेकक्षणेऽप्यस्य ७६
तस्मादेकक्षणस्यास्य° ४६
तस्मादेकात्मभावेऽस्मिन् २९
तस्मादेकात्मवादोऽयं ३०
तस्मादेव निवृत्तिः स्यात् ४३
तस्माद् देहादतोऽन्यत्र ३२
तस्माद् बुद्ध्यादितत्त्वानि ५२
तस्माद् बैन्दव एवेष्ट १२
तस्माद् भूतात्मकादेव २८
तस्माद् भोग्यस्य संवित्तौ ४०
तस्मादिति परं किंचिद् ९१
तस्माद्येनात्मनो ज्ञानं ३४
तस्माद् वस्त्वात्मिका माया १८
तस्माद् व्यापकमेवेष्टं ६७
तस्मान्नियतयः सन्तु ४८
तस्मान्नियतिकालौ च ४१
तस्मिन्निरुद्धे तत्कार्यं ३८
तस्मिन् पुंस्त्वमले च्छिन्ने ५०
तस्मिन् विस्पष्टचिन्मात्रः २
तस्य क्षणिकता ज्ञेया ८१
तस्य देहादयोऽप्येवं ४
तस्य नाशोऽवकाशस्य ७८
तस्य शक्तिः स्मृता भिन्ना ९४
तस्य शुद्धिर्विभेदेन ४९
तस्य सूक्ष्मतरा बुद्धिः १७
तस्यां तु जायते सर्वं ९५

तस्यां पतितमात्रायां २५
तस्याः कलादिवर्गाश्च ५६
तस्या एव तदीयेन ४४
तस्या विवेकरूपत्वात् ४०
तस्याश्चाभिन्नरूपत्वात् ३७
तस्यास्तत्रापि हेतुत्वे ४०
तानि प्राप्यानि सर्वैस्तु ६
ताभ्यः सर्वे समुत्पन्नाः ९४
तामिस्रमिति पञ्चैव ५९
तावत्येव भवेद्विप्रा° ९१
तावदर्थं न गृह्णाति ९७
ताश्च भौवनदेहोर्ध्वम्° ४३
तिरोदधाति भगवान् ४६
तिरोहितोऽपि कार्येषु ३७
तीव्रादिधर्मोपितत्वात् ७८
तृतीयः पठ्यते तन्त्रे २२
ते कार्याण्येव दृश्यन्ते ७४
ते गुणाः प्रकृतौ सापि ९२
ते च प्रयोज्यकर्तारः ४८
ते च विज्ञेयकर्तव्य° ३७
तेजः कवचसाधर्म्यात् ७
तेन कालेन तत्रस्थाः ४५
तेन ते सर्वसिद्धीनां ९४
तेषां तु व्यतिरेकेण ८६
तेषां देहेन्द्रियादीनाम् ११
तेषां यत् कारणं विप्राः ११
तेषां लयादिभोगेऽपि १५
तेषामपि ह्यसद्भावे १५
तेषामेका परा योनिः ९४
तेषामेवास्तु कर्तृत्वं ९
तैजसादप्यहंकारात् ६२
तैरेव खचितं वाक्यं ७९
तैर्विना तु भवेच्छक्तिः ९४
तैश्च शक्तियुतैर्वर्णैः ९६
तौयेनैव प्रतिष्ठास्य ८३
त्यक्तसूक्ष्मबहिर्देहा २३
त्रयोऽत्र धर्ममुख्यास्तु ५३
त्रितयं कार्यतः सिद्धिः ५७
त्वगादेश्चैवमुन्नेयम् ६४

द

दर्शनस्पर्शनाभ्यां तु ७३
दर्शनान्तरदृष्टचातः १६
दशधा तम उद्दिष्टं ५९
दशधा वर्तमानोऽन्तः ८३
दशैवं सिद्धयः प्रोक्ताः ५६
दानं नाम स्वसत्तैव २६
दानादिकर्मभिर्भाव्यः ५६
दानोपवासतीर्थानां ५५
दार्ढ्यं च निर्दयत्वं च ५३
दिक्कालविषयं बाह्यं ६७
दिग्देशोपहितः शब्दः ६७
दिदृक्षा जायते शंभोः २५
दिव्यस्त्रीभिर्महाश्चर्यैः १३
दिव्याङ्गनेयमेवेति ३५
दिव्यादिव्यविभेदेन ५९
दीक्षया तु पुरा पुंसि ४९
दीक्षा मदाज्ञा हन्त्येषा २६
दीक्षायां भगवंस्तत्त्वं ५
दीक्षैव मोचयेत् पाशान् २५
दीपवत् तत्कृता स्थानं ६६
दीपेन ग्रहणं तद्वत् ६३
दीपेनोपकृतं चक्षुः ६६
दुःखं तन्मन्यमानस्य ५७
दुःखसंपूर्णताहेतोः १३
दुःखस्य कारणं स्नेहः ५७

दुःखेषु हि नियुञ्जानः १५
दुःख्यहं सुख्यहं चेति १३
दुष्पूरोऽयमतो हेतोः ५८
दृक्क्रियारूपिणी शक्तिः ३७
दृक्शक्तिव्यञ्जिका सूक्ष्मा २१
दृशो गोलकमात्रत्वे ६६
दृश्यते तेन हेतुत्वात् ८२
दृश्यमानमसार्वज्ञ्यं ९२
दृष्टं सामान्यतो दृष्टं ८८
दृष्टान्तः साध्यविकलः ८९
दृष्टान्तापेक्षया व्याप्तिः ८७
दृष्टान्तो द्विविधोऽप्युक्तः ८७
दृष्टान्तोपनयावेतौ ८७
देवानां शिवभक्तानां ५५
देहादेः कारणं माया १६
देहादेर्यदि जन्माद्याः २९
देहेन्द्रियादिमन्तोऽपि ११
देहे सत्यपि चैतन्यं २८
द्वयोरर्थान्तरत्वेन ७०
द्वयोरैहिकयोस्तुल्य° २५
द्वाभ्यां स किल भागाभ्यां ४५
द्वितीयस्य कुतः पूर्वं ८२
द्व्यालम्बा संशयो बुद्धिः ८४

ध

धर्मश्च द्विविधस्तत्र ५४
धर्माधर्मात्मकं कर्म ३५
धर्मिणो ज्ञाननिष्ठस्य ५८
धर्मिणो यावती व्याप्तिः ३२
धर्मो ज्ञानं च वैराग्यं ५३
धर्मो दशविधो ज्ञानम् ६०
धारावाहिकधीश्चापि ७०

न

न कदाचित्तमः कार्यं २०
न कर्म कारणं तत्र ४४
न कर्मभोगवैचित्र्ये १४
न कर्म स्वफलं पुंसां ४७
न कस्यापि पदार्थस्य ८४
न कार्यकरणो योगः ९६
न कालापेक्षयोत्पत्तिः ४५
न किंचिज्ज्ञस्तु यः सोऽयं ३४
न किंचिदपरस्तस्य १९
न गुणात्मत्वतस्तेषां ५१
न गुणानां ममावस्था ५१
न गुणी कश्चिदर्थोऽस्ति ७२
न च गौणमुपादानं १६
न चक्षुः शब्दसंवित्तौ ८४
न च निर्विषयं ज्ञानं ३२
न च प्रध्वंससंज्ञोऽयं ७८
न च प्रवर्तते यस्मात् ९
न च भिन्नो न भिन्नो वा ९६
न च मायामलस्तस्मात् २०
न च मायास्वरूपेण २०
न च विज्ञेयकर्तव्य° ३७
न च शास्त्रप्रणेतृत्वं ९६
न च स्वयं स्ववैविध्ये १९
न चात्मनि स्थितिस्तेषां १८, २१
न चात्र प्रकृतिर्हेतुः १९
न चात्र शब्दतन्मात्र° ११
न चात्र सत्त्वतमसी ५१
न चान्यं त्वनवस्थात्र ५१
न चायं प्रतिबिम्बोऽपि ३१
च चार्षं पौरुषैर्वाकचैः ९१
न चावृतिर्मलेनेष्टा ३७
न चित्संनिधिमात्रेण ६७

न चेतनो यतो वृद्धौ ३१
न चेतरेतराभावः ८८
न चेन्द्रियार्थमात्रस्य ८६
न चेह सत्त्वतमसी २०
न जायते ततः कार्यं ३८
न जुगुप्सादयः सर्वं° ६०
न तद्वन्नियमेनापि ४७
न तन्नित्यं यथा तन्तुः १८
न तस्याभिमुखी ज्ञानं ८४
न तादात्म्यात् स्थिता किंतु ११
न तावज्ज्ञानघटयोः १७
न तावत् प्रतिबन्धोऽत्र ८२
न तावत् प्रागभावोऽयं ७८
न तु कारणवैकल्यात् ८२
न तु व्यापार इत्युक्ता ५
न तु स्थानान्तरादानात् २६
न तेऽपि सिद्धा गण्यन्ते ५७
न तेभ्योऽर्थे मतिः काचित् ७०
न ते शिवस्य विषयाः २४
न दीपकारणं वह्निः २०
न दृष्टं शुक्तिकाज्ञानं ३४
न देवैर्ब्रह्मणो वाक्यं ९१
न देहपरिणामत्वं ३२
न देहस्यैव जन्माद्याः २९
ननु कारणवैकल्यं ८२
ननु गोलकमेवेदं ६५
ननु ज्ञातोऽयमर्थस्य ८१
ननु धर्मिपरिच्छेदः ७४
ननु न स्यात् कुतो ज्ञानं ८४
ननु नायनतेजोभिः ६६
ननु प्रत्यक्षमाकाशं ७७
ननु प्रमेयसंसिद्धौ ८६
न संबन्धोज्झितो यस्मात् ९६
ननु भोगेन्द्रियाद्यैश्च १३
ननु वर्णैः क्रमान्नादः ८०
ननु सर्वत्र बोधानु° ६३
नन्वमूर्ततया तस्याः ७५
नन्वमूर्ता हि तन्मात्रा ७५
नन्वर्थव्यतिरेकेण ८०
नन्वाकाशगुणः शब्दः ७९
न बिन्दुकर्मणां ज्ञानं १८
न बौद्धमेतद् ज्ञातृत्वं ३१
न मायेयस्य रागस्य ४२
न मोक्षं याति पुरुषः ९
न युक्तियुक्तास्ते यस्मात् ४६
न योजको भवेच्छब्दः ९७
न वर्णव्यतिरेकेण ८०, ९६
न वर्णा संहतिं यान्ति ९६
न विज्ञानाकलस्तेन ४९
न विरुद्धास्तु धर्माद्याः २०
न विशेषास्तु सामान्यात् २०
न व्यापारविशेषेण ३
न शक्तिरेव कर्तव्यः ३८
न शब्दप्रभवः शब्दः १२
न शास्त्रकरणे शक्तः ९५
न संबन्धोज्झितो यस्मात् ९६
न संविद्रूपयोर्भेदो ७१
न समास्तत्र केनापि १९
न सर्वे संप्रयुज्यन्तेः २९
न साध्यसाधनान्वेयः ९६
न स्यादध्यवसायोऽपि १२
न हि कार्योपसंहारात् ९२
न हि कालस्य नित्यत्वं ४५
न हि कुम्भगतं रूपं ७१
न हि धर्मस्थितिर्दृष्टा ७४
न हि प्रपञ्चो वस्त्वात्मा १६

न हि भूम्यन्तरा निष्ठौ ७६
न हि मुक्तः शिवो वापि ३४
न हि यस्मात् परं कार्यं ३७
न हि विद्याफलादीनां ५७
न हि वृत्त्यविनाभावः ४३
न हि संकल्पमात्रेण ३
न हि स्वतो दिशां भेदः ७५
न हेतुसाधनाभावः २९
न ह्यंशेन पदार्थानां ३३
न ह्यकारणकाः शब्दाः ११
न ह्यभावो घटस्येह ३३
नाकाले जायते कश्चित् ४३
नाकाशाज्जायते वायुः ८३
नाग्नेरापस्ततः पृथ्वी ८३
नाग्न्यङ्गुल्योर्हि वैकल्यं ८२
नातिव्याप्तिश्च मेयेषु ८५
नात्र बुद्धीन्द्रियाण्येव ६८
नात्र शक्तिरुपादानं १०
नादस्तु कल्प्यते येन ८०
नादस्तु व्यज्यते वर्णैः ८१
नादस्य बिन्दोः प्रसृतिः ९१
नाद्यमन्त्रस्य सत्तायाः ८२
नाध्यक्षगम्यं तत्तावत् २९
नानामतिकरः सोऽयं ३६
नानित्यधर्मधर्मी स्यात् ३२
नानैकान्तिकता हेतोः ८
नान्यथा व्याप्तिरप्यस्ति ८४
नान्यथास्यार्चनं यस्मात् ९५
नान्यशास्त्राविरोधेन ९१
नाप्राप्तग्रहणं दृष्टं ६५
नाप्यप्रकाशीकरणं ३७
नाप्ययस्कान्तदृष्टान्तः ९
नाप्येतदन्यथाज्ञानं ३३
नाभुक्तां क्षीयते कर्म १४
नामजात्यादिसंबद्ध ८६
नावकाशाद् दिशां भेदः ७९
नाशोऽपि सर्ववस्तूनां ४६
नासतो विद्यते भावः ३०
नित्यं प्रध्वस्तकालुष्यः ५५
नित्यशत्रुमृगानीक° १
नित्य आत्मा विभुत्वेन ८९
नित्यकालानुवर्तित्वं ४५
नित्यत्वमिव तेनात्मा ३२
नित्यत्वादणवो हेतुः ८९
नित्यमास्ते शिवस्यास्य ९२
नित्यसिद्धं विभोर्विप्राः ८
नित्यसिद्धाश्च ताः प्रोक्ताः ७
नित्यैका व्यापिनी वस्तु° १६
नित्यैषाशेषकार्याणां १८
निद्राधिक्यं मदालस्ये ५३
निमित्तमीश्वरस्तेषां ९४
नियतिश्च तया कर्म° ४१
नियमः पठ्यते शास्त्रे ५४
नियुनक्ति महेशानः ५९
नियुनक्त्यनुगृह्यान्यं २७
निरुपादानकं विश्वं ८९
निर्माय स्त्रीसहस्राणि ५८
निर्विकल्पाक्षबोधेऽपि १७
निर्विपक्षोऽन्वयी हेतुः ८८
निवार्यमाणः स्फोटोऽयं ८२
निवृत्तः परपीडायाः ५५
निवृत्तिश्च प्रतिष्ठा च १३, ९३
निवृत्तिस्तमसा सिद्धा ५१
निषेधमन्तरा भेदः १८
निष्कलान्नादरूपात्मा ९०

नीलं व्योमेति तन्मिथ्या ७७
नेत्रवच्छ्रवणं गत्वा ६७
नेष्टं यद्यात्मसामर्थ्यं ६८
नेह ग्राहकता बुद्धेः ३३
नेह पुंस्तत्वसंशुद्धि° ५०
नैकमिन्द्रियमेष्टव्यं ६७
नैतत् पश्वात्मनां विश्वं १३
नैतावता तदेकत्वं ६२
नैवं रज्जुः कदाचित्तु १७
नैव स्फोटकरी सद्यः ३७
नैवेह शंभोर्नैर्घृण्यं १५
नैव बन्धो विशुद्धाध्व° १४
नो चेत् तदवकाशाख्यं ७६
नो चेद् गोलकमात्रस्य ६५
नो चेद् युगपदुत्पत्तिः ६८
नोत्पाद्योत्पादकात्मापि १७
नोपादानं तु वर्णानां ७९

प

पक्षधर्मः सपक्षः सन् ८८
पक्षपातविनिर्मुक्तः ४८, ९०
पक्षादित्रितये वर्त° ८९
पक्षोऽध्यक्षनिरस्तोऽयं ३२
पञ्चकञ्चुकसंयुक्तः ८९
पञ्च कर्मेन्द्रियाणि स्युः ६२
